<तृतीयोऽङ्कः>

अभिज्ञानशाकुन्तलम्

(ABHIJÑĀNAŚĀKUNTALAM)



डॉ. वेद प्रकाश शास्त्री

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयोऽङ्कः

(ततः प्रविशति कुशानादाय यजमानशिष्यः)

शिष्यः—(विचिन्त्य सविस्मयम्) अहो! महाप्रभावो राजा दुष्यन्तः; येन प्रविष्टमात्र एवाश्रमं तत्रभवति सारथिद्वितीये राजनि निरुपप्लवानि नः कर्म्माणि संवृत्तानि।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणेव धनुषः स हि विघ्नान् व्यपोहति॥ १॥

(ततः=तदनन्तरम्, पूर्ववृत्तानन्तरम्, यागाय प्रवृत्तो यजमानः स चासौ शिष्यश्च यजमान-शिष्यः, अथवा यजमानस्य=याज्ञिकस्य मुनेः कण्वस्य, शिष्यः, कुशान्=दर्भान्, आदाय=गृहीत्वा, प्रविशति रङ्गेति शेषः।)

शिष्यः—(विचिन्त्य=किमपि विचार्य, सविस्मयम्=साश्चर्यम्) अहो=इत्याश्चर्ये, महान् प्रभावो यस्य सः महाप्रभावः=महातेजाः, राजा दुष्यन्तः, येन=हेतुना, प्रविष्टमात्रे एव=आश्रमेऽस्मिन् प्रवेशकाल एव, तत्रभवति=मान्ये, सारथिर्द्वितीयो यस्य तस्मिन् सारथिद्वितीये=मात्रैकेनैव सारथिना सह, राजनि=दुष्यन्ते, नः=अस्माकं, कर्म्माणि=यज्ञकार्याणि, निरुपप्लवानि=उपद्रवशून्यानि, संवृत्तानि=निष्पन्नानि।

अन्वयः—बाणसन्धाने का कथा? हि सः दूरतः धनुषः हुङ्कारेणेव ज्याशब्देनैव विघ्नान् व्यपोहति॥ १॥

का कथेति। बाणसन्धाने=धनुषि बाणारोपणे, का कथा=किमुच्यते (तत्प्रसङ्ग एव नास्तीत्यर्थः), हि=यतः, सः=राजा, दूरतः=दूरात्, धनुषः=कोदण्डस्य, हुङ्कारेणेव=हुङ्कारशब्देनेव, ज्याशब्देनैव=प्रत्यञ्चाध्वनिनैव, विघ्नान्=यज्ञीयविघ्नान् (अन्तरायभूतान्), व्यपोहति=अपसारयति। अत्र का कथेत्यर्थापत्यलङ्कारः, हुङ्कारेणेति उत्प्रेक्षा, अनयोर्मिथो नैरपेक्षेण संसृष्टिः। केचित् उपमया धनुषो मुनिसाम्यं गम्यते, अपरे—काव्यलिङ्गमिति॥ १॥

(तदनन्तर कुश लिये हुए यजमान शिष्य (यज्ञ में प्रवृत्त शिष्य) प्रवेश करता है।)

शिष्य—(विस्मय के साथ) अहो! राजा दुष्यन्त बड़े प्रभावशाली हैं. केवल सारथी को अपने साथ लिये हुए इस राजा दुष्यन्त के यहाँ आते ही हमलोगों के यज्ञकार्य बिना किसी उपद्रव के सम्पन्न हो गये।

बाण के सन्धान की तो बात ही क्या, हुंकार सदृश केवल प्रत्यञ्चा की टंकार करते ही वह (राजा दुष्यन्त) समस्त विघ्नों को दूर कर दिया करता है॥ १॥

(Then enter a pupil sacrificer with sacred grass in his hand)

Pupil—*(with surprise)* Oh! of great prowess is king Duśyanta. Since his majesty the king Duśyanta has entered the hermitage, our rites have become free from all obstacles.

What speak of aiming the arrow? For, by the mere twang of his bow from afar, as if by the round of the bow, he dispels the obstacles. (1)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावदेतान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपाहरामि। (परिक्रम्यावलोक्य च आकाशे) प्रियंवदे! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीदलानि नीयन्ते? (श्रुतिमभिनीय) किं कथयसि 'आतपलङ्घनाद्बलवदसुस्थशरीरा शकुन्तला, तस्याः शरीर-निर्वापणाय' इति? प्रियंवदे! यत्नादुपचर्य्यताम्, सा हि तत्रभवतः कुलपतेर्द्वितीय-मुच्छ्वसितम्। अहमपि तावद्वैतानिकं शान्त्युदकमस्या एव गौतमीहस्ते विसर्जयामि।

(इति निष्क्रान्तः।)

विष्कम्भकः।

भावार्थः—धनुषि बाणारोपणे का कथा? तत्प्रसङ्ग एव नास्ति, यतः सः कोदण्डीय-प्रत्यञ्चा ध्वनिनैव अन्तरायभूतान् यज्ञीयविघ्नान् दूरादेव अपसारयति॥ १॥

यावद् इति वाक्यालङ्कारे, एतान्=करस्थितान्, वेद्यां=यागार्थविरचितवेदिकायां, संस्तरणार्थं=पातनार्थम्, दर्भान्=कुशान्, ऋत्विग्भ्यः=याजकेभ्यः, उपनयामि=समर्पयामि। (परि-क्रम्य=यज्ञशालागमनार्थमीषत्पादप्रक्षेपं कृत्वा, अवलोक्य च=पुरतः दृष्ट्वा, आकाशे=निरालम्बे) (प्रियंवदया नलिनीपत्रानयनं विलोक्य रङ्गभूमौ प्रियंवदाभावेऽपि तामुद्दिश्य आकाशभाषितं करोति) प्रियंवदे! कस्य=जनस्य उपयोगाय, इदम्, उशीरानुलेपनम्=उशीरमूलघर्षितलेपद्रव्यम्, च=तथा, मृणालवन्ति=मृणालसनाथानि, नलिनीदलानि=कमलपत्राणि, नीयन्ते=प्राप्यन्ते, त्वयेति शेषः। (श्रुतिमभिनीय=श्रवणं रूपयित्वा) भावनया तदुत्तरमनूद्य पृच्छति—किं कथयसि? आतप-

---

तब तक वेदी पर बिछाने के लिए ये कुश ऋत्विजों को दे आऊँ। **(घूमकर तथा देखकर आकाश की ओर मुँह करके)** प्रियंवदे! तुम यह खस का लेप और मृणाल युक्त कमल के पत्ते किसके लिए ले जा रही हो? **(सुनने का अभिनय करके)** क्या कह रही हो? लू लग जाने से शकुन्तला का शरीर अस्वस्थ हो गया है, उसी को शान्ति पहुँचाने के लिए? प्रियंवदे! यत्नपूर्वक उसका उपचार (चिकित्सा) करो, क्योंकि वह पूज्य कुलपति का दूसरा प्राण है। तब तक मैं भी गौतमी के हाथों से यज्ञ का शान्तिजल उसके लिए भेजता हूँ। **(यह कहकर प्रस्थान करता है।)**

विष्कम्भक।

I shall just take these Darbha-blades to the priests for strewing (scattering) on the altar. *(Going round and observing, in the air)* Priyaṁvadā! for whom you are carrying this Uśira-unguent and the lotus-leaves with stalks? *(Acting as if he heard something)* What do you say? That Śakuntalā is excessively indisposed from injury inflicted by the heat, for cooling her body. I am carrying all these. Priyaṁvadā! attend her carefully as she is the other breath (second life) of his holiness the lord of sages. I shall also in the meanwhile send for her sacrificial soothing water through Gautamī. *(Exit)*.

End of the prelude.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशति समदनावस्थो राजा)

राजा—(सचिन्तं निःश्वस्य)

जाने तपसो वीर्य्यं सा बाला परवतीति मे विदितम्।
न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम्॥ २॥

लङ्घनात्—आतपेन=रवितापेन, लङ्घनात्=उद्यानपरिष्कारादिकरणात्, बलवत्=अत्यर्थम्, असुस्थम्=अप्रकृतिस्थं, शरीरं यस्याः सा बलवदसुस्थशरीरा, शकुन्तला=कण्वदुहिता, तस्याः=शकुन्तलायाः, शरीरनिर्वापणाय=देहसन्तापोपशमनाय इति। प्रियंवदे! यत्नादुपचर्य्यताम्=यत्नपूर्वकं तस्याः परिचर्या क्रियताम्, हि=यतः, सा=शकुन्तला, तत्रभवतः=पूज्यस्य, कुलपतेः=अयुतशिष्यपोषकस्य कण्वस्य, द्वितीयम्=अपरम्, उच्छ्वसितम्=जीवनम् (जीवनवद्वत्सला इत्यर्थः), तावत् अहमपि, वैतानिकं=यागसम्भवम्, शान्त्युदकम्=शान्त्यर्थमुदकम्, अस्या एव=शकुन्तलायै एव, गौतम्याः=तदाख्यायाः कस्याश्चित् तापस्याः, हस्ते विसर्जयामि=प्रेरयामि, केनचिद्दृत्विजेति शेषः।

विष्कम्भकः—विष्कभ्नाति=नियोजयति पूर्वापरकथाभागं यः सः विष्कम्भकः (कथाभागविशेषः)।

(ततः=तदनन्तरम्, मदनावस्थया सह वर्त्तत इति समदनावस्थः=स्मरदशाक्रान्तः, राजा=दुष्यन्तः, प्रविशति=रङ्गे समायाति।)

राजा—(चिन्तया=शकुन्तलाविषयकचिन्तया, सह वर्त्तत इति सचिन्तम्, निःश्वस्य=दीर्घनिश्वासमुत्सृज्य)

अन्वयः—तपसः वीर्यं जाने सा बाला परवती इति मे विदितम्, निम्नात् सलिलम् इव ततः मे हृदयं न निवर्त्तते॥ २॥

जाने इति। तपसः=तपस्यायाः, वीर्यं=सामर्थ्यं, जाने=अवगच्छामि, सा बाला=शकुन्तला, परवती=पराधीना, इति=इत्यपि, मे=मम, विदितम्=ज्ञातम्, निम्नात्=नीचैर्भूतलभागात्, सलिलं=जलमिव, ततः=शकुन्तलातः, मे=मम, हृदयं=चेतः, न निवर्त्तते=न प्रत्यावर्त्तते (न तामुज्झितुं यतते)। अत्र प्रथमार्धे अप्रस्तुतप्रशंसा, द्वितीयार्धे तु श्रौतोपमालङ्कारः। आर्य्या जातिः॥ २॥

भावार्थः—अहं मुनीनां तपस्यायाः प्रभावं जानामि। कथितं हि पुरातनैः यत्— 'तत् सर्वं तपसा साध्यं तपो हि दुरतिक्रमः' इति। इत्यपि विदितं यत् सा बाला (शकुन्तला) पराधीना अस्ति अत एव पराधीनतया स्वेच्छया प्रवर्त्तितुं सर्वथैवाक्षमास्ति। तथापि नीचैर्भूतलभागात् यथा सलिलं तथैव शकुन्तलातो मनो न निवर्तयितुं शक्नोमि॥ २॥

(इसके पश्चात् कामभावयुक्त राजा दुष्यन्त का प्रवेश)

राजा—(चिन्तायुक्त भाव से दीर्घ साँस लेकर) मैं तपस्या का बल जानता हूँ और यह भी जानता हूँ कि वह शकुन्तला पराधीन है, किन्तु फिर भी जैसे नीची भूमि से जल अपने आप ऊपर नहीं चढ़ता उसी प्रकार मेरा मन उसकी ओर से नहीं हटता॥ २॥

(Then enter the love-lorn king)

King—(In sorrowful mood, with deep breath) I know the power of penance. It is also known to me that the girl i.e. Śakuntalā is not independent. Yet I am not able to withdraw my heart from her. (2)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भगवन्! मन्मथ! कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत्। (स्मृत्वा) आं ज्ञातम्—

अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवाम्बुराशौ।
त्वमन्यथा मन्मथ! मद्विधानां भस्मावशेषः कथमेवमुष्णः॥ ३॥

अपि च—त्वया चन्द्रमसा च अतिविश्वसनीयाभ्यामभिसन्धीयते कामिजनसार्थः। कुतः—

भगवन्!=माहात्म्यशालिन्! मनो मथ्नातीति तत्सम्बोधने हे मन्मथ! ते=तव, कुसुमम्=पुष्पमात्रम्, आयुधम्=अस्त्रं, यस्य तस्य कुसुमायुधस्य, एतत्=ईदृशं, तैक्ष्ण्यम्=उग्रता, कुतः=कस्मात्? (भवतः कुसुमायुधत्वेन कुसुमधर्मस्य विपरीता उग्रता आश्चर्यजनयितृ एवेति विभावयामि।) (स्मृत्वा=स्मरणं कृत्वा) आं ज्ञातम्=विदितम्।

अन्वयः—हे मन्मथ! अम्बुराशौ और्वः हरस्य कोपवह्निः अद्यापि त्वयि ज्वलति इति नूनम्। अन्यथा भस्मावशेषः त्वं मद्विधानां कथम् एवं उष्णः भवसि इति शेषः॥ ३॥

अद्यापीति। हे मन्मथ=हे काम! अम्बुराशौ=समुद्रे, और्वः=वाडवाग्निरिव, हरस्य=शङ्करस्य, कोपवह्निः=क्रोधाग्निः, अद्यापि=इदानीमपि, त्वयि=मन्मथे, ज्वलति=दीप्यते, इति नूनम्=ध्रुवम्। अन्यथा=नो चेत्, भस्मैव अवशेषः, यस्य भस्मावशेषः=भस्ममात्रावशिष्टः, त्वम्=भवान्, मद्विधानां=मादृशानां (विरहकातराणामिति भावः), कथं=केन वा हेतुना, एवम्=अनेन प्रकारेण, उष्णः=सन्तापको भवसीति शेषः॥ ३॥

अत्र पूर्वार्द्धार्थं प्रति उत्तरार्द्धार्थस्य हेतुत्वात्काव्यलिङ्गालङ्कारः। अम्बुराशावौर्व इत्यत्र उपमाऽपि प्रतीयते। ममेत्यनभिधाय मद्विधेत्यभिधानादप्रस्तुतप्रशंसा, हरकोप एव वह्निरिति रूपकञ्च। नूनमित्युत्प्रेक्षाव्यञ्जकतयात्रोत्प्रेक्षालङ्कारः तथा च उष्णत्वेन वह्निमत्वसाधनान्मन्मथे हरकोपानल-ज्वलनसद्भावानुभवरूपवैचित्र्यज्ञानादनुमानालङ्कार इति केचित्। उपजातिः वृत्तम्॥ ३॥

भावार्थः—हे मन्मथ! सागरे वाडवाग्निरिव हरस्य कोपाग्निरिदानीमपि त्वयि ज्वलत्येव इति निश्चिनोमि। यद्येवं न स्यात् तर्हि भस्मावशेषः त्वं मद्विधानां विरहकातराणां कथम् अनेन प्रकारेण सन्तापको भवसि? इत्यनुमानेनापि नावागन्तुं शक्यते॥ ३॥

भगवन् मन्मथ! आप तो कुसुमायुध हैं फिर आप में इतनी प्रखरता कहाँ से आ गई? **(विचारकर)** ओह! समझ गया—

समुद्र में वाडवाग्नि की भाँति भगवान् रुद्र का कोपानल आज भी आपके शरीर में धधक रहा है। ऐसा न होता तो हे मन्मथ! भस्मावशेष होने पर आप हम जैसे विरहातुर जनों के लिए कदापि इतने उष्ण (उग्र) न होते॥ ३॥

और भी—आप और चन्द्र दोनों ही संसार के बड़े विश्वासपात्र हैं, फिर भी आप दोनों मिलकर कामीजनों को सताते हैं। क्योंकि—

God of love! Though you are flower-weaponed, from where has this harshness came in you? *(Thinking)* Oh! understood—

Verily even now the fire of Hara's anger burns in you, like the submarine fire in the ocean, or, otherwise, of God of love! the termenter of the mind! how could you, whose remains are only ashes, be so hot to people like me? (3)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥ ४॥

अपि च=अन्यच्च, त्वया=भवता मन्मंथेन, चन्द्रमसा=चन्द्रेण च, अतिविश्वसनीयाभ्यां=मृदुत्वेनातिविश्वस्ताभ्याम् (सद्भ्यामित्यर्थः), कामिजनसार्थः=कामुकजनगोष्ठी, अभिसन्धीयते=तीव्रताप्रकाशनात् प्रतार्य्यते। कुतः—

अन्वयः—तव कुसुमशरत्वम् इन्दोः शीतरश्मित्वम्, इदं द्वयं मद्विधेषु अयथार्थं दृश्यते। (यतः) इन्दुः हिमगर्भैः मयूखैः अग्निं विसृजति, (तथा) त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥ ४॥

तवेति। तव=भवतः (मन्मथस्य, वञ्चकस्येति यावत्), कुसुमानि=पुष्पाणि, शराः=सायकाः, यस्य तस्य भावस्तत्त्वं कुसुमशरत्वम्=पुष्पबाणसंज्ञत्वम्, इन्दोः=चन्द्रमसः, शीताः=शीतलाः, रश्मयः=मयूखाः, यस्य तस्य भावस्तत्त्वं शीतरश्मित्वं=हिमांशुसंज्ञत्वम् (न तापकारित्वमित्यर्थः), इदं द्वयम्=एतदुभयम्, मद्विधेषु=मादृशेषु विरहकातरेषु विषये, अयथार्थम्=अलीकम्, दृश्यते=ज्ञायते (तथाहि कुसुमशरस्यापि तव मामुद्दिश्याकुसुमशरत्वं जातं, शीतरश्मेरपीन्दोरुष्णरश्मित्वं जातत्वादुभयविशेषणमलीकमिति मन्ये)। (कथम्? इत्यस्य स्वयमेव उत्तरं ददाति—) (यतः) इन्दुः=चन्द्रः, हिमं गर्भे=अभ्यन्तरे, येषां तैस्तथोक्तैः, मयूखैः=रश्मिभिः, अग्निम्=अनलम्, विसृजति=विशेषेण वर्षति, (तथा च) त्वमपि=भवान् कुसुमायुधोऽपि, कुसुमबाणान्=पुष्परचितमृदुलबाणान्, वज्राणां सार इव सारः=बलं, येषां ते वज्रसाराः, अवज्रसारान् वज्रसारान् करोषीति वज्रसारीकरोषि=कुसुमरचितबाणेषु काठिन्यमाधाय प्रहरसि।

अत्र राज्ञ उन्मादव्यञ्जकत्वाद् गुणत्वं, चन्द्रप्रसङ्गस्य दृष्टान्तार्थकत्वाद् दृष्टान्तञ्च। केचित्तु कुसुमशरत्वस्य शीतरश्मित्वस्य चोभयार्थत्वं प्रति परार्द्धवाक्यद्वयस्य हेतुत्वेनोपन्यासाद् वाक्यार्थहेतुकं काव्यलिङ्गम्, अन्ये हिमगर्भमयूखेभ्योऽग्निविसर्गोत्पत्तेः कुसुमबाणेभ्यो वज्रवत्प्रहारोत्पत्तेश्च विषमालङ्कार इति मन्यन्ते। किञ्च एतेषामलङ्काराणाम् अङ्गाङ्गिभावेन सङ्करः। मालिनी नाम वृत्तम्॥ ४॥

भावार्थः—यद्यपि विश्वस्मिन् विश्वेऽस्मिन् भवतः कुसुमशरत्वं चन्द्रस्य च शीतरश्मित्वं प्रसिद्धम्, परन्तु एतदुभयं मद्विधेषु विरहीजनेषु विषये अलीकमिव दृश्यते। यतो हि चन्द्रः

आपका कुसुमायुध तथा चन्द्र का शीतरश्मि कहा जाना—ये दोनों बातें हम जैसों के लिए यथार्थ नहीं हैं, क्योंकि चन्द्रमा अपनी हिमगर्भ (बर्फीली) किरणों द्वारा आग बरसाता है और आप अपने पुष्पबाणों को वज्रसार की भाँति कठिनतर बना रहे हैं॥ ४॥

Moreover, by you and by the moon, who are worthy of confidence, the whole host of lovers is deceived. Why so—

You are having arrows of flowers and the moon cool rays, both these are observed to be false in the case of persons like me. The moon discharges fire with its rays charged with cold and you also make your arrows of flowers as hard as thunderbolt itself. (4)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथवा—

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे।
यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति॥५॥

भगवन्! एवमुपालब्धस्य ते न मां प्रत्यनुक्रोशः।

वृथैव सङ्कल्पशतैरजस्रम्, अनङ्ग! नीतोऽसि मयाऽतिवृद्धिम्।
आकृष्य चापं श्रवणोपकण्ठे मय्येव युक्तस्तव बाणमोक्षः॥६॥

स्वकीयहिमगर्भैः मयूखैः अनलं वर्षति तथा कुसुमायुधस्त्वमपि स्वकीयकुसुमबाणान् वज्रसारीकरोषि—वज्राणामिव कुसुमानां काठिन्यमाधाय प्रहरसि॥४॥

अथवा=पक्षान्तरे—

अन्वयः—मकरकेतुः मदिरायतनयनां ताम् अधिकृत्य यदि प्रहरति इति अनिशं मे मनसः रुजम् आवहन् अभिमतः स्यादिति शेषः॥५॥

अनिशमिति। मकरकेतुः=मकरध्वजः कामः, मदिरे=मत्ते, आयते=दीर्घे, नयने=नेत्रे, यस्यास्तां मदिरायतनयनां, ताम्=शकुन्तलाम्, अधिकृत्य=उद्दिश्य, यदि प्रहरति=(माम्) शरैर्विध्यति, इति=एवंविधे सति, अनिशं=निरन्तरम्, मे=मम, मनसः=चेतसः, रुजं=पीडाम्, आवहन्=दधदपि (उत्पादयन्नपि), अभिमतः=आनुकूल्येन हेतुना सम्मतः स्याद्। अत्र विरोधाभासोऽलङ्कारः, आर्या जातिः॥५॥

भावार्थः—मकरध्वजः कामः मदिरायतेक्षणां तां शकुन्तलामुद्दिश्य यदि मां शरैर्विध्यति तदा निरन्तरं मम चेतसः पीडामुत्पादयन्नपि आनुकूल्येन हेतुना सम्मत एव (तदुपरि ममानुरागस्य सततं विद्यमानतया यथाहं कामेन पीडितः, तथैव मदुपरि अनुरागवशेन सा यदि कामेन पीडिता स्यात्, तदोभयानुरागस्य उभयपीडायाश्च समानतया अवश्यमुभयोः सङ्गमनं भविष्यत्येव इति निश्चिनोमि, अत एव तथाविधपीडा सम्मतैव)॥५॥

भगवन्=सर्वशक्तिसम्पन्न! भो मन्मथ! एवं=पूर्वोक्तप्रकारेण, उपालब्धस्य=भर्त्सितस्य, मां प्रति=मामुद्दिश्य, ते=तव, अनुक्रोशः=कृपा, न=नोत्पद्यते। (केनचिद् दुःखितेन भर्त्सितो दुःखदः सन्तापितो भूत्वा तदुपरि कृपामातनोतीति तत्त्वयि न दृश्यते।)

अथवा—

यदि मीनकेतु कामदेव उस मदभरे नयनों वाली को उद्देश्य बनाकर मुझे अपने बाणों का निशाना बनाता है तो सतत मन में पीड़ा होते हुए भी वह हमें प्रिय ही लगता है॥५॥

भगवन्! इस प्रकार (दुःखी मन से) मैं आपका तिरस्कार करता हूँ, फिर भी मेरे प्रति आपके मन में दया उत्पन्न नहीं होती?

Or—

The fish-bannerd God, though incessantly causing anguish to my mind, is acceptable to me, in as much as he strikes me with refrence to that hermit-girl Śakuntalā of long-maddenning eyes.

Respectable sir, though I insult you thus, even though you are not showing any mercy on me.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(सखेदं परिक्रम्य) क्वं नु खलु निरस्तविघ्नैस्तपस्विभिरनुज्ञातः खिन्नमात्मानं विनोदयामि। न च प्रियादर्शनादृते शरणमन्यत्। यावदेनामन्विष्यामि। (ऊर्ध्वमवलोक्य) इमामुग्रतपां वेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना तत्रभवती शकुन्तला

अन्वयः—अनङ्ग! मया अजस्रं सङ्कल्पशतैः वृथैव अतिवृद्धिं नीतः असि, श्रवणोपकण्ठे चापम् आकृष्य तव मय्येव बाणमोक्षः युक्तः॥ ६॥

वृथैवेति। अनङ्ग=हे मदन! मया=दुष्यन्तेन, अजस्रं=सततम्, सङ्कल्पशतैः=बहुभिर्मनोरथैः (शकुन्तलामुद्दिश्य इति शेषः), वृथैव=निष्फलमेव, अतिवृद्धिम्=अतीव वैपुल्यम्, नीतः=प्रापितः, असि=त्वमिति शेषः। श्रवणोपकण्ठे=कर्णान्तिके, चापं=धनुः, आकृष्य=आकर्षणं कृत्वा, तव= भवतः, अनङ्गस्य, मय्येव=दुष्यन्ते एव, बाणमोक्षः=शरविक्षेपः, युक्तः=किमुचितः। अत्र काव्यलिङ्ग अलङ्कारः, उपजातिर्नाम वृत्तम्॥ ६॥

भावार्थः—भो मदन! मया शकुन्तलामुद्दिश्य बहुभिर्मनोरथैः त्वं सततं वृथैव अतिवृद्धिं नीतोऽसि। कर्णान्तिके चापमाकृष्य तव मय्येव बाणमोक्षः किं समुचितः ? न कोऽपि पालकं प्रहरति परन्तु भवद्विचेष्टितं लोकमर्यादाविरुद्धत्वात् शङ्कां जनयति मे मनसि यद् मत्कृतं भवदीयपालनं सर्वथैवानुचितमासीदिति।

(खेदेन सहितं यथा स्यात्तथा सखेदं=सपरितापं, परिक्रम्य=सञ्चारमभिनीय) निरस्ता विघ्ना येषां तैर्निरस्तविघ्नैः=अपसारितयज्ञव्याघातैः, तपस्विभिः=मुनिभिः, अनुज्ञातः=पूर्ववद् यथेच्छ-भ्रमणादिविषये अनुमोदितः, अहं=दुष्यन्तः, क्व=कस्मिन् देशे, नुशब्दः खलुशब्दश्च वितर्के, खिन्नं=शकुन्तलाविरहेण परितप्तम्, आत्मानम्=स्वकीयं मनः, विनोदयामि=सन्तापापनोदं करोमि ? प्रियायाः=शकुन्तलायाः, दर्शनादृते=दर्शनं विना, अन्यत्=किमपि अपरं, शरणम्=आश्रयस्थानं, न=नास्ति (प्रियादर्शनमेव शरणमिति भावः)। यावत्=इत्यवधारणे, एनां=शकुन्तलाम्, अन्विष्यामि=मार्गयिष्यामि। (ऊर्ध्वमवलोक्य=सूर्याभिमुखं दृष्ट्वा) इमाम्, उग्रम्=उत्कटं, तपती-

---

हे अनङ्ग! नित्य विविध प्रकार के व्यर्थ सङ्कल्प करके मैंने आपको अत्यधिक बढ़ाया है, इस स्थिति में क्या यह उचित है कि आप कानों तक धनुष खींचकर मुझे ही अपने बाणों का निशाना बनाएँ ?॥ ६॥

(दुःखपूर्वक कुछ चलकर) विघ्न दूर हो जाने के पश्चात् मुनियों द्वारा यथेच्छ घूमने-फिरने की अनुमति मिल जाने पर मैं कहाँ जाकर अपने मन को प्रसन्न करूँ? प्रिया (शकुन्तला) के दर्शन के अतिरिक्त और कोई आश्रयस्थान मुझे तो नहीं सूझता। तो चलूँ उसी को ढूँढूँ। **(ऊपर देखकर)** इस भयंकर ऊष्मा के समय लतामण्डपों से वेष्टित मालिनी नदी के

O' cupid! daily having false fancies I have increased you too much, in this condition, is it proper for you to target your arrows on me drawing your bow close to the ear? (6)

(Walking round in fatigue) Where indeed can I, who am allowed to wander as per my desire, by the ascetics, being their sacrifical rite concluded without any obstacle, divert my fatigued self? I feel, there is no resort for me except a sight of my beloved. I shall just seek her. *(Looking up or at the sun)* Probably, Śakuntalā

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गमयति। भवतु, तत्रैव तावद् गच्छामि। (परिक्रम्यावलोक्य च) अनया बालपादपवीथ्या् सुतनुरचिरं गतेति तर्कयामि। कुतः—

सम्मीलन्ति न तावद्बन्धनकोषास्तयावचितपुष्पाः।
क्षीरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः॥७॥

त्युग्रतपा ताम् उग्रतपाम्=प्रखरतापयुताम्, वेलाम्=समयम्, लतावलयवत्सु=लतामण्डपवेष्टितेषु, मालिनीतीरेषु=मालिनी नाम नद्याः तटभूमिषु, तत्रभवती=माननीया, शकुन्तला=कण्वदुहिता, प्रायेण=अधिकतरम्, ससखीजना, गमयति=गच्छति, यापयति, भवतु=अस्तु, तावद्, तत्रैव=स्निग्ध-छायायुते पुलिने, गच्छामि। (परिक्रम्य=सञ्चारमुपन्यस्य, च=तथा, अवलोक्य=दृष्ट्वा) सुतनु=शोभनाङ्गी सा शकुन्तला, अनया=परिदृश्यमानया, बालपादपवीथ्या=नवीनतरुलतापरिसरमार्गेण (बालाश्च ते पादपाः बालपादपास्तेषां वीथिस्तया), अचिरम्=अधुनैव, गता इति तर्कयामि=विभावयामि। कुतः=कथं विभावयामि? इत्यस्य हेतुमुत्थापयति—

अन्वयः—तया अवचितपुष्पाः अमी बन्धनकोषाः न तावत् सम्मीलन्ति, (तथा) अमी किसलयच्छेदाः क्षीरेण स्निग्धाः दृश्यन्ते॥७॥

क्षीरेति। तया=शकुन्तलया, अवचितानि=कराभ्यां लूनानि, पुष्पाणि=कुसुमानि, येषां ते अवचितपुष्पाः, अमी=परिदृश्यमानाः, बन्धनकोषाः=पुष्पबन्धनाधारभूता वृन्तोदूर्ध्वभागाः, न तावत्=नेदानीमपि, सम्मीलन्ति=सङ्कुचन्ति, (तथा) अमी=परिदृश्यमानाः, किसलयच्छेदाः=पल्लवखण्डाश्च, क्षीरेण=निर्यासने, स्निग्धाः=सस्नेहाः, दृश्यन्ते=उपलक्ष्यन्ते। अत्र स्वभावोक्तिः समुच्चयालङ्कारश्च। आर्य्या जातिः॥७॥

भावार्थः—सुतन्वा शकुन्तलया अवचितपुष्पाः (अत एव) एतेषां परिदृश्यमानाः पुष्पबन्धनाधारभूता वृन्तोदूर्ध्वभागा इदानीमपि न सङ्कुचन्ति तथा पल्लवखण्डाश्च क्षीरेण स्निग्धाः दृश्यन्ते (सुचिरं पत्रत्रोटने तु तत्प्रवृत्तनिर्य्यासशोषणसम्भवाद्रुक्षतैवाऽभविष्यदिति भावः), अत एव विभावयामि यत् अचिरादेव सा स्थानादस्मात् प्रतिनिवृत्ता इति॥७॥

तट पर शकुन्तला-प्रायः अपनी सखियों के साथ जाती है। अच्छा, तो वहीं जाता हूँ। (**घूमकर और देखकर**) इस छोटे-छोटे वृक्षों की प्रगदण्डी से वह कोमलाङ्गी शकुन्तला अभी-अभी गई है, मुझे ऐसा आभास हो रहा है, क्योंकि—

जिन वृन्तों से उसने फूल तोड़े हैं वे अभी भी संकुचित नहीं हुए हैं एवं पत्रखण्ड भी अभी तक दूध से चिकने बने हुए हैं (अतः वह अभी यहाँ से गई है यह प्रतीत होता है।)॥७॥

---

is passing this time of intense heat on the banks of the Mālinī river possessed of bowers of creepers, together with her friends. Ther I shall just go. *(Walking round and observing)* I guess, that by this footpath, covered with tiny trees, that charming lady has recently gone. Because—

From which foot-stalks she had plucked the flowers, still those are not closed and the leaves too are greasy with its flowing milk or exudation. (7)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(स्पर्शं रूपयित्वा) अहो! प्रवातसुभगोऽयं वनोद्देशः।

शक्योऽरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः॥ ८॥

(विलोक्य) हन्त! अस्मिन् वेतसलतामण्डपे सन्निहितया शकुन्तलया भवितव्यम्। तथाहि—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥ ९॥

(स्पर्शं=वातस्पर्शम्, रूपयित्वा=अभिनीय) अहो! इति हर्षे विस्मये वा, अयं=परिदृश्यमानः, वनोद्देशः=वनैकभागः, प्रकृष्टः=प्रभूतः, वातः=मारुतः, यत्र प्रवातः, अत एव सुभगः=सुखकरः, अथवा प्रवातेन=तादृशगुणशालिना वातेन, सुभगः=मनोहरः (अस्तीति शेषः)।

अन्वयः—अरविन्दसुरभिः तथा मालिनीतरङ्गाणां कणवाही पवनः अनङ्गतप्तैः अङ्गैः निर्दयम् आलिङ्गितुं शक्यः॥ ८॥

शक्य इति। अरविन्दानाम्=कमलानाम्, सुरभिः=सुगन्धिः, इति अरविन्दसुरभिः, तथा मालिन्याः=तन्नामसरितः, तरङ्गाणाम्=वीचीनाम्, कल्लोलानाम्, कणवाही=जलबिन्दुः, परागकण-वाहीश्च (शैत्यसुरभिः सम्पन्नः), पवनः=मारुतः, अनङ्गेन=कामेन, तप्तैः=सन्तप्तैः (कामजनितदाह-युक्तैः), अङ्गैः=शरीरावयवैः, निर्दयं=गाढम्, आलिङ्गितुं=परिसेवितुम्, शक्यः=योग्यः। अत्र गम्योत्प्रेक्षा स्वभावोक्तिश्च। आर्य्या जातिः॥ ८॥

भावार्थः—मया दुष्यन्तेन कमलसुरभिः मालिनीतरङ्गकणवाही शीतलमन्दसुगन्धितवातः कामजनितदाहयुक्तैः शरीरावयवैः आतृप्ति परिसेवितुं योग्यः। रमणीयेऽस्मिन् वनोद्देशे शीतलमन्द-सुगन्धितवायुना एवं कामजनितदाहपीडितः मदीयः शरीरः किञ्चिच्छर्म प्राप्स्यतीति मन्ये॥ ८॥

(विलोक्य=दृष्ट्वा) हन्त=इति हर्षे, अस्मिन्=परिदृश्यमाने, वेतसलतामण्डपे=वेत्रवल्ली-विरचितमण्डपे, सन्निहितया=अवस्थितया, शकुन्तलया=मुनिकन्यया, भवितव्यम्। तथाहि—

(स्पर्श का अभिनय करके) अरे! वन के इस भाग में बड़ी अच्छी वायु प्रवाहित हो रही है (अथवा शीतल मन्द सुगन्ध वायु के कारण यह वन-भाग अतीव सुखकर हो रहा है।)

कमलों के स्पर्श से सुगन्धित, मालिनी की लहरों के कणों को उड़ाने के कारण शीतल वायु का काम सन्तापित अङ्गों द्वारा गूढ़ आलिङ्गन करने के लिए मैं सर्वथा योग्य हूँ॥ ८॥

(देखकर) अच्छा, इस बेंत के लतामण्डप में शकुन्तला को अवश्य होना चाहिए; क्योंकि—

(feigning touch) Oh! how delightful is this place of forest by (reason of) the fresh breeze.

It is possible for me to embrace closely the breeze, fragrant with lotuses and wafting particles of the waves of the Mālinī river, with limbs inflamed by love. (8)

(Observing) Most probably she is present in this bower of creepers, enclosed by canes. For—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावद्विटपान्तरेणावलोकयामि। (तथा कृत्वा सहर्षम्) अये! लब्धं नेत्रनिर्वाणम्। एषा मनोरथप्रिया मे सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामुपास्यते। भवतु, लताव्यवहितः शृणोमि विश्वस्तकथितान्यासाम्। (इति विलोकयन् स्थितः।)

अन्वयः—अस्य पाण्डुसिकते द्वारे पुरस्तात् अभ्युन्नता पश्चात् जघनगौरवात् अवगाढा अभिनवा पदपंक्तिः दृश्यते॥ ९॥

अभ्युन्नतेति। अस्य=लतामण्डपस्य, पाण्डुः सिकता यस्मिन् तस्मिन् पाण्डुसिकते=पाण्डुरवर्णबालुकाविशिष्टे, द्वारे=प्रवेशमार्गे, पुरस्तात्=पादाग्रभागे, अभ्युन्नता=कियदंशेन समुन्नता, तथा पश्चात्=पार्ष्णिभागे, जघनस्य=श्रोणीपुरोभागस्य, गौरवात्=गुरुत्वाद्, अवगाढा=किञ्चिन्निम्ना, अभिनवा=सद्यः चिह्निता, पदपंक्तिः=चरणन्यासजन्यचिह्नश्रेणी, दृश्यते=विलोक्यते (अत एव तया अत्रैव भवितव्यम्)। अत्र स्वभावोक्तिरलङ्कारः, साध्यस्य प्रतीतेरनुमानञ्च। आर्य्या जातिः॥ ९॥

भावार्थः—अस्य लतामण्डपस्य पाण्डुसिकते द्वारे वर्तमाना अभिनवा पदपंक्तिः पादाग्रभागे अभ्युन्नता तथा पार्ष्णिभागे गौरवात् किञ्चिन्निम्ना प्रगटयति यत् शकुन्तलया अत्रैव भवितव्यम्॥ ९॥

यावत्=यावत्कालपर्यन्तम्, विटपान्तरेण=शाखावकाशेन, अवलोकयामि=पश्यामि। (तथा कृत्वा=तथैव विधाय, सहर्षम्) अये=इति हर्षे, नेत्रयोः=नयनयोः, निर्वाणम्=निवृत्तिः, नेत्रनिर्वाणम्, लब्धम्=प्राप्तम्। एषा, मे=मम, मनोरथेन=अभिलाषामात्रेणैव, प्रिया=हृदयवल्लभा (अपरिणीतत्वाद् न तु तत्त्वेन कल्पिता) मनोरथप्रिया, कुसुमान्येवास्तरणम्=उत्तरच्छदः, तेन सह वर्त्तत इति तत् सकुसुमास्तरणम्, शिलापट्टम्=पाषाणखण्डम्, अधिशयाना=अधितिष्ठन्ती, सखीभ्याम्=अनसूया-प्रियंवदाभ्याम्, उपास्यते=शुश्रूष्यते। भवतु, लतया व्यवहितः लताव्यवहितः=लतापृष्ठे गोपित-सर्वावयवः, आसाम्=अनसूयाप्रियंवदाभ्यां सह शकुन्तलायाः, विश्वस्तकथितानि=रहस्यवार्त्ताः, शृणोमि=श्रोष्यामि (इति=एवं, विलोकयन्=पश्यन्, स्थितः)।

इस लतामण्डप के द्वार की उज्ज्वल बालुका-राशि पर आगे की ओर ऊँची तथा जघनभाग के भार से पीछे की ओर झुकी हुई पदपंक्ति दिखायी दे रही है॥ ९॥

तब तक वृक्षों की आड़ से देखूँगा। (**वैसा करके हर्षपूर्वक**) ओ! नेत्रों को मोक्ष (आनन्द) मिल गया। यह मेरी हृदयवल्लभा फूलों के बिस्तर से ढँकी चट्टान पर लेटी हुई है और दोनों सखियाँ उसकी सेवा कर रही हैं। अच्छा, लता के पीछे छिपकर इनकी विश्वासपूर्ण (गोपनीय) बातें सुनूँ। (**देखता हुआ खड़ा हो जाता है।**)

At its entrance, where there is white sand, appears a fresh line of foot-steps, raised infront and depressed behind owing to the heaviness of the buttocks. (9)

I shall just observe through the interstice of the branches. *(Walking round and doing the same joyfully)* Ah! I obtained the highest delight of my eyes. Here the dearest of my desire, lying on a slab of stone, possessing a covering of flowers, is being served upon by her two friends. Well, I shall hear their confidential utterances. *(Stands gazing)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

सख्यौ—(उपवीज्य) हला सउंतले! अवि सुहाअदि दे णलिणीवत्तवादो? **[हला शकुन्तले! अपि सुखयति ते नलिनीपत्रवातः ?]**

शकुन्तला—(सखेदम्) किं वीजअंति मं पियसहीओ? **[किं वीजयतो मां प्रियसख्यौ ?]**

(सख्यौ सविषादं परस्परमवलोकयतः।)

राजा—बलवदसुस्थशरीरा तत्रभवती दृश्यते। (सवितर्कम्) तत् किमयमातपदोषः स्यात्, उत यथा मे मनसि वर्त्तते। (साभिलाषं निर्वर्ण्य) अथवा कृतं सन्देहेन—

(ततः=तदनन्तरम्, यथोक्तः व्यापारो यस्याः सा यथोक्तव्यापारः=यथानिर्दिष्टव्यापारा, शकुन्तला=कण्वपुत्री, सखीभ्याम्=अनसूयाप्रियंवदाभ्यां सह, प्रविशति=रङ्गे समायाति, उपस्थिता भवति।)

सख्यौ—(उपवीज्य=व्यजनं कृत्वा) हला शकुन्तले! अपि=प्रश्ने, ते=तव (तुभ्यम्), नलिनीपत्रवातः=कमलिनीदलवीजनजनितपवनः, सुखयति=सुखमुत्पादयति ?

शकुन्तला—(सखेदम्=खेदपूर्वकम्) प्रियसख्यौ! मां=शकुन्तलाम्, किं वीजयतः= व्यजनं कुरुतः ? (किमित्यादि नायिकोक्त्या वीजनादिकं तया न ज्ञातम् इति 'मूर्च्छावस्था सूचिता' इति केचित्।)

(सख्यौ सविषादं=विषण्णतापूर्वकं, परस्परम्=अन्योन्यं, अवलोकयतः=पश्यतः।)

राजा—(शकुन्तलायास्तथाविधामवस्थां सख्योश्च तादृशीं प्रवृत्तिञ्चावलोक्याह) बलवत्=अधिकम्, असुस्थं=सुस्थतारहितं, शरीरं यस्याः सा असुस्थशरीरा, तत्रभवती=मान्या

(इसके बाद पूर्वोक्त व्यापार युक्त शकुन्तला सखियों के साथ मञ्च पर आती है)

दोनों सखियाँ—(पंखा झलकर) सखी शकुन्तला! कमल के पत्तों की हवा तो अच्छी लगती है न?

शकुन्तला—(खेदपूर्वक) सखियो! आप दोनों क्या झल रही हैं?

(दोनों सखियाँ विषादपूर्वक एक-दूसरी को देखती हैं।)

राजा—मान्या शकुन्तला का शरीर अतीव अस्वस्थ दिखाई पड़ रहा है। **(तर्क-वितर्क करते हुए)** तो क्या यह लू लगने के कारण है अथवा जैसे मेरे मन में कामजन्य सन्ताप है, उसी प्रकार इसे भी है? **(चावपूर्वक देखकर)** अथवा सन्देह करना व्यर्थ है।

(Then enter Śakuntalā engaged as described with her two girl friends)

Both friends—(Having fanned her) Dear Śakuntalā! does the air of lotus-leaves give you pleasure?

Śakuntalā—What! are my friends fanning me?

(Both girl-friends gesticulating sorrow, stare at each other)

King—Śakuntalā appears to be unwell. *(With a guess)* Can

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः साबाधं तदपि कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु॥ १०॥

शकुन्तला, दृश्यते=शयनवीजनादिना ज्ञायते। (सवितर्कम्=सविकल्पं तर्कयति) तत्=अस्वास्थ्यम्, किमयम्=दृश्यमानमस्वास्थ्यम्, आतपस्य=ग्रीष्मस्य, दोषः, आतप एव दोष इति वा, किं स्यादिति सम्भावनायाम्, उत=अथवा, यथा मे मनसि वर्त्तते=यौवनाविर्भावान्मदजनितसन्ताप एवायमिति यन्मया सम्भावितं तथैव तत् स्यादिति भावः। (साभिलाषं=सस्पृहं, निर्वर्ण्य=निरीक्ष्य) अथवा, सन्देहेन=संशयेन, कृतम् अलम्=नास्त्यत्र सन्देहलेशावसर इति भावः।

अन्वयः—स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं प्रियायाः इदं वपुः साबाधं तदपि कमनीयं मनसिजनिदाघप्रसरयोः तापः समः कामं तु युवतिषु ग्रीष्मस्य अपराद्धम् एवं न॥ १०॥

स्तनेति। स्तनयोः=कुचयोः, न्यस्तं=दत्तम् (तापोपशमनायेति भावः), उशीरं=नलदानुलेपः, यत्र तत्तादृशम्, तथा प्रशिथिलं=देहदौर्बल्यातिशयात् श्लथीभूतं, मृणालः=पद्मखण्डमेव, एकम्=अनन्यं, वलयं यत्र तत् प्रशिथिलमृणालैकवलयम्, प्रियायाः=शकुन्तलायाः, इदं=परिदृश्यमानम्, वपुः=शरीरम्, साबाधम्=पीडया सहितं वर्त्तते, तदपि=सरुजं प्रतीयमानमपि, कमनीयम्=मनोहरमेव दृश्यते। मनसिजः=कामः, निदाघः=ग्रीष्मः, तयोः प्रसरौ=वेगौ, तयोः मनसिजनिदाघप्रसरयोः, तापः=दाहः, समः=तुल्यः, कामम्=इत्यनुमतम्। तु=किन्तु, युवतिषु=तरुणीषु, ग्रीष्मस्य=निदाघस्य, अपराद्धं=तापकष्टप्रदत्वादपराधः, एवम्=ईदृशम्, सुभगं=सौन्दर्याधायकत्वात्सम्पादकम् न भवति॥ १०॥

भावार्थः—तापोपशमनाय स्तनन्यस्तनलदानुलेपनं तथा देहदौर्बल्यातिशयात् प्रशिथिलमृणालैकवलयमण्डितम् इदं परिदृश्यमानं शकुन्तलायाः शरीरं पीडया सहितमपि कमनीयमेव प्रतिभाति। मनसिजनिदाघप्रसरयोः दाहतुल्य इत्यनुमतम्, किन्तु तरुणीषु विषये ग्रीष्मस्य अपराद्धम् एवं सुभगं—सौन्दर्याधायकत्वात्सम्पादकं न भवति। अस्याः कामतापेनैवेदमस्वास्थ्यमिति भावः। अत्र व्यतिरेकाऽलङ्कारः, केचित्तु—कामप्रकृतिकत्वेनानुमीयमानत्वादनुमानालङ्कार इति। शिखरिणी नाम वृत्तम्॥ १०॥

वक्ष (स्तनों) पर खस का लेप किया हुआ है, मृणाल (कमलनाल) से निर्मित कंगन ढीला पड़ गया है। यद्यपि इसका शरीर अत्यधिक पीड़ायुक्त है तथापि सुन्दर दिखाई देता है। काम और ग्रीष्म दोनों का ताप समान है, यह मैं मानता हूँ तथापि ग्रीष्म तरुणियों पर इस प्रकार का सुन्दर अपराध नहीं कर सक ̈॥ १०॥

---

this then be the fault of excess heat or sunstock or is it as in my mind *(Observing with a longing)* or, away with doubt.

Indeseribably charming is this distressed form of my beloved with the Uśeera applied to the bosom and with the single bracelet of lotus-stalk loose. Granted that the suffering caused by love and advance of summer is similar; but injury is not inflicted uopn young maidens by the summer in such a charming way:.(10)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियंवदा—(जनान्तिकम्) अणसूए! तस्स राएसिणो पढमदंसणादो आरंभिअ पज्जुच्छुअमणा सउंतला; ण क्खु से अण्णणिमित्तो आतंको भवे। **[अनसूये तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकमनाः शकुन्तला; न खल्वस्या अन्यनिमित्त आतङ्को भवेत्।]**

अनसूया—सहि! मम वि एआरिसी आसंका हिअअस्स। भोदु, पुच्छिस्सं दाव णं। (प्रकाशम्) सहि! पुच्छिदव्वासि किं पि। वलीओ क्खु दे अंगाणं संदावो। **[सखि! ममापि एतादृशी आशङ्का हृदयस्य भवतु, प्रक्ष्यामि तावदेनाम्। सखि! प्रष्टव्याऽसि किमपि। बलीयान् खलु ते अङ्गानां सन्तापः।]**

राजा—वक्तव्यमेव—

शशिकरविशदान्यस्यास्तथाहि दुःसहनिदाघशंसीनि।
भिन्नानि श्यामिकया मृणालनिर्म्माणवलयानि॥ ११॥

प्रियंवदा—(जनान्तिकम्=सख्याः कर्णे) अनसूये! तस्य=पूर्वोक्तस्य, राजर्षेः=दुष्यन्तस्य, प्रथमदर्शनादारभ्य, पर्य्युत्सुकमनाः=कामेनोत्कण्ठमाना, शकुन्तला=अस्मत्सखी, खलु=इति निश्चयेन, अस्याः=शकुन्तलायाः, अन्यन्निमित्तः=निदानं, यस्य सोऽन्यनिमित्तः, आतङ्कः=सन्तापः, न भवेत् इति तर्कयामि।

अनसूया—सखि! ममापि हृदयस्येति सम्बन्धः। एतादृशी=राजर्षेर्दर्शनात् प्रभृति पर्य्युत्सुकमनस्त्वेन शकुन्तलाया राजर्षिनिमित्तकोऽयमातङ्कः, इति आशङ्का=वितर्कः। भवतु, तावदेनाम्=शकुन्तलाम्, प्रक्ष्यामि। (प्रकाशम्=इति मनसि विचार्य्य पृच्छति) सखि=शकुन्तले! किमपि प्रष्टव्यासि=त्वत्सकाशाद् किमप्यहं ज्ञातुमिच्छामि इति भावः, ते=तव, अङ्गानाम्=अवयवानां, सन्तापः=पीडा, बलीयान्=प्रबलतरः, खलु (अतो द्रष्टव्यत्वमिति भावः)।

राजा—वक्तव्यमेव=अङ्गानां सन्तापः बलीयान् इत्येवं प्रष्टव्यमेव।

प्रियंवदा—(**धीरे से**) अनसूये! उन राजर्षि के प्रथम दर्शन से ही शकुन्तला उत्कंठित है, उसे इसके अतिरिक्त अन्य सन्ताप हो ही नहीं सकता।

अनसूया—सखी! मेरे हृदय में भी इसी प्रकार की आशंका है। अच्छा तो इसी से पूछती हूँ। सखी! मैं तुमसे कुछ पूछना चाहती हूँ, क्योंकि तुम्हारे अङ्गों में भयंकर सन्ताप हो रहा है।

राजा—पूछना ही चाहिए। क्योंकि—

चन्द्र-रश्मियों के समान इसके उज्ज्वल मृणालकङ्कण काले होकर दुःसह सन्ताप को सूचित कर रहे हैं।

Priyaṁvadā*—*(Aside) From very begining of the first sight of that royal sage, Śakuntalā is as though uneasy. May it indeed be that this condition of her is on that account only.

***Anasūyā*—**Dear! I also have the same doubt. Well, I shall ask from her only. *(Loudly)* Dear! I want to ask you something because your limbs are suffering excessively.

***King*—**She must be enquired. For—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(पूर्वार्द्धेन शयनादुत्थाय) हला! भण, जं वत्तुकामाऽसि। [**हला! भण, यद् वक्तुकामाऽसि।**]

अनसूया—हला सउंतले! अलब्भंतरा अम्हे दे मणोगदस्स वुत्तंतस्स; किंतु जादिसी इदिहासकधाणुबंधेसुं कामिअणाणं अवत्था सुणीअदि, तादिसी तुह त्ति तक्केमि। ता कधेहि किं निमित्तं दे अअं आआसत्ति। विआरं परमत्थदो अआणिअ अणारंभो किल पदीआरस्स। [**हला शकुन्तले! अलब्धान्तरा वयं ते मनोगतस्य वृत्तान्तस्य; किन्तु यादृशी इतिहासकथानुबन्धेषु कामिजनानामवस्था श्रूयंते, तादृशी तवेति तर्कयामि। तत् कथय, किन्निमित्तं ते अयम् आयास इति। विकारं परमार्थतः अज्ञात्वा अनारम्भः किल प्रतीकारस्य।**]

अन्वयः—तथाहि शशिकरविशदानि अस्याः मृणालनिर्माणवलयानि श्यामिकया भिन्नानि दुःसहनिदाघशंसीनि॥ ११॥

शशिकरेति। तथाहि=तेन एव रूपेण, शशिनः=चन्द्रस्य, कराः=रश्मय इव, विशदानि=स्वच्छानि, अस्याः=शकुन्तलायाः, मृणालनिर्माणवलयानि—मृणालैः निर्माणं येषां तानि च तानि वलयानि चेति=बिसनिर्मितकङ्कणानि, श्यामिकया=अङ्गतापजनितकृष्णरेखया, भिन्नानि=संसक्तानि सन्ति, दुःसहनिदाघशंसीनि—दुःसहं निदाघं शंसन्ति=द्योतयन्तीति दुःसहनिदाघशंसीनि=असह्य-सन्तापसूचकानि संवृत्तानि। अत्र लुप्तोपमा, उत्तरार्द्धे वाक्यार्थहेतुकं काव्यलिङ्गम्, अनुमानमित्यपरे। आर्या जातिः॥ ११॥

भावार्थः—तेन एव रूपेण चन्द्ररश्मय इव स्वच्छानि अस्याः शकुन्तलायाः बिस निर्मित-कङ्कणानि अङ्गतापजनितकृष्णरेखया भिन्नानीव प्रतीयन्ते तथा च ते दुःसहसन्तापसूचकान्यपि संवृत्तानि॥ ११॥

शकुन्तला—(पूर्वार्द्धेन=शरीरस्य पूर्वभागेन, शयनादुत्थाय=शय्यायाः उत्थाय) हला=सखि! भण=कथय, यत्=किंमपि, वक्तुकामासि=वक्तुमिच्छसि।

अनसूया—हला शकुन्तले! न लब्धं=न परिज्ञातम्, अन्तरं=तत्त्वं, याभिस्ताः अलब्धान्तरा=अनवगतरहस्या, वयं, ते=तव, मनोगतस्य=हृदयस्थितस्य, वृत्तान्तस्य=विषयस्य,

---

शकुन्तला—(शरीर का अगला भाग शय्या से ऊपर उठाकर) सखी! बोलो, क्या कहना चाहती हो?

अनसूया—सखी शकुन्तला! तुम्हारे मनोगत भावों में प्रवेश कर पाने में तो मैं असमर्थ हूँ, किन्तु ऐतिहासिक कथाओं में कामियों की जो दशा सुनी जाती है, वैसी ही दशा तुम्हारी भी प्रतीत होती है। इस स्थिति में तुम्हीं बताओ कि तुम्हारा यह सन्ताप किस कारण

Her bracelet of lotus stalk, bright as moon rays, turning black, informing her excessive suffering.

Śakuntalā—*(Raising her front portion from her bed)* Dear! speak, what ever you want to speak.

Anasūyā—Dear Śakuntalā, though I am unable to enter into your hearty thoughts, but as I heard in the historical stories, about the conditions of lovers or lustful person, I find your condition to be very similar. In this condition please let me know the reason of

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अनसूययाऽपि मदीयस्तर्कोऽवगतः।

शकुन्तला—बलीओ आआसो, ण सक्कणोमि सहसा णिवेदिदुं। **[बलीयानायासः, न शक्नोमि सहसा निवेदयितुम्।]**

प्रियंवदा—सुष्ठु क्खु एसा भणादि, किं एदं अत्तणो उबद्दवं णिगूहसि, अणुदिअसं क्खु परिहीअसि। अंगेसु लावण्णमई छाआ केवलं तुमं ण मुंचदि। **[सुष्ठु खल्वेषा भणति, कमेतमात्मन उपद्रवं निगूहसि, अनुदिवसं खलु परिहीयसे। अङ्गेषु लावण्यमयी छाया केवलं त्वां न मुञ्चति।]**

किन्तु=तथापि, यादृशी, इतिहासकथानाम्=पुरावृत्तोपाख्यानानाम्, अनुबन्धेषु=गोष्ठीषु, कामिजनानां=कामपीडितानाम्, अवस्था=दशाविशेषः, श्रूयते=आकर्ण्यते, तादृशी अवस्था, तवेति=तवास्ति, इति=इत्थम्, तर्कयामि=सम्भावयामि। तत्=तस्मात्, कथय=ब्रूहि, किन्निमित्तं=किमर्थम्, ते=तव, अयम्=पुरतः दृश्यमानः, आयासः=शरीरसन्तापः, परमार्थतः=तत्त्वतः, विकारं=रोगम्, अज्ञात्वा=अविज्ञाय, प्रतीकारस्य=चिकित्सायाः, अनारम्भः=आरम्भो नास्ति, किलेति प्रसिद्धौ।

राजा—अनसूयापि, मदीयस्तर्कः=सन्तापः, काममूलक इत्यभ्यूहः, अवगतः=परिज्ञातः, मम यथैव सम्भावनाऽस्ति तथैवानया पृच्छ्यत इति भावः।

शकुन्तला—बलीयान्=बलवत्तरः, आयासः=सन्तापः, सहसा=अकस्मादेव, सत्वरेति भावः, निवेदयितुम्=तत्त्वतो ज्ञापयितुम्, न शक्नोमि=न समर्था भवामि।

प्रियंवदा—एषा=अनसूया, सुष्ठु=युक्तियुक्तं, भणति=कथयति, खलु इति निश्चयेन, किमेतम्, आत्मनः=स्वस्य, उपद्रवं=विकारम्, निगूहसि=संवृणोषि (नैतदयुक्तमिति), अनुदिवसं=प्रतिदिनम्, परिहीयसे=क्रमशः क्षीयसे, खलु, अङ्गेषु=अवयवेषु, लावण्यं=प्रकृतं, यत्र सा लावण्यमयी=लावण्यप्रचुरा, छाया=कान्तिः, केवलं=मात्रं, त्वाम्, न मुञ्चति=न परित्यजति।

राजा—प्रियंवदा, अवितथं=सत्यम्, आह=ब्रवीति। तथाहि—

है ? जब तक भलीभाँति विकार का परिज्ञान न हो जाय तब तक उसका प्रतिकार किया ही नहीं जा सकता।

राजा—अनसूया भी मेरे विचार जान गयी है।

शकुन्तला—बड़ा सन्ताप है, सहसा उसे बता पाने में मैं भी असमर्थ हूँ।

प्रियंवदा—यह ठीक ही तो कह रही है। तुम अपना उपद्रव (रोग) छिपा क्यों रही हो ? तुम दिन-दिन घुलती जा रही हो। केवल लावण्यमयी छाया तुम्हें नहीं छोड़ रही है।

राजा—प्रियंवदा सत्य कह रही है। क्योंकि—

---

your suffering? Before proper diagnosis a remedy or treatment can not be prescribed.

King—Anasūyā has recongnised my idea too.

Śakuntalā—Too much suffering is mine, I am unable to describe it atonce.

Priyaṁvadā—What she says is very correct. Why do you hide your suffering? Day by day you are slimming. Only loveliness (beauty) of your limbs is not separating from you.

King—Priyaṁvadā is very correct. Because—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अवितथमाह प्रियंवदा। तथाहि—

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनग्लानेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥ १२॥

शकुन्तला—(निश्वस्य) कस्स वा अण्णस्स कधइस्सं, किंतु आआसहेतुआ वो भविस्सं। **[कस्य वा अन्यस्य कथयिष्यामि, किन्तु आयासहेतुका वो भविष्यामि।]**

अन्वयः—आननं क्षामक्षामकपोलम् उरः काठिन्यमुक्तस्तनं मध्यः क्लान्ततरः अंसौ प्रकामविनतौ छविः पाण्डुरा अत एव मदनग्लाना इयं पत्राणां शोषणेन मरुता स्पृष्टा माधवी लता इव शोच्या च प्रियदर्शना च आलक्ष्यते॥ १२॥

क्षामेति। आननंम्=शकुन्तलायाः मुखम्, क्षामक्षामौ=अतिशयेन क्षीणौ, कपोलौ=गण्डौ, यस्य तत् क्षामक्षामकपोलमाननम्, तथा उरः=वक्षःस्थलम्, काठिन्यमुक्तौ=काठिन्येन रहितौ, स्तनौ यस्य तत् काठिन्यमुक्तस्तनम्, तथा मध्यः=कटिदेशः, अतिशयेन क्लान्त इति क्लान्ततरः= नितरां दुर्बलः, तथा अंसौ=स्कन्धौ, प्रकामविनतौ=प्रकर्षेणावनतौ, तथा छविः=देहकान्तिः, पाण्डुरा= पाण्डुवर्णा, अत एव मदनग्लाना=कामविकृता, इयं शकुन्तला, पत्राणां=पल्लवानां, शोषणेन=सारशोषं कुर्वता, मरुता=वायुना, स्पृष्टा=लङ्घिता, माधवी लता इव=तन्नाम वल्लीव, शोच्या=शोचनीया च, प्रियं=मनोज्ञं, दर्शनं=प्रतिकृतिः, यस्याः सा प्रियदर्शना च, आलक्ष्यते= परिदृश्यते।

अत्र शोच्या च प्रियदर्शना चेति विरोधाभासः, मदनेन क्लिष्टेति शोच्यत्वे हेतुत्वोपादनात् काव्यलिङ्गम् उपमा च, स्वभावोक्तिरिति केचित्। केचित् आननादेर्बहुविधहेतोरुपन्यासात् समुच्चयालङ्कार इति। शब्दालङ्कारोऽनुप्रासोऽत्र। शार्दूलविक्रीडितं छन्दः॥ १२॥

भावार्थः—शकुन्तलायाः मुखम् अतिशयक्षीणकपोलयुक्तमस्ति तथा वक्षःस्थलं सर्वथा काठिन्यरहितं-उरोजयुक्तमस्ति। कटिप्रदेशस्तु क्लान्ततरः तथा स्कन्धौ प्रकर्षेणावनतौ। देहकान्तिस्तु पाण्डुरा इव प्रतिभाति। अत एव कामविकृता इयं शकुन्तला सारशोषं कुर्वता मरुता स्पृष्टा माधवीवल्लीव शोच्या प्रियदर्शना च आलक्ष्यते॥ १२॥

शकुन्तला के मुखमण्डल के दोनों कपोल भीतर धँस गये हैं। वक्षःस्थल के स्तन कठोरता-हीन हो गये हैं। कटिप्रदेश दुर्बल हो गया है। कन्धे अत्यधिक झुक गये हैं। शरीर की कान्ति पीली पड़ गयी है। इस प्रकार पत्तों को सुखाने वाली हवा के लगने से मुरझाई हुई माधवीलता के समान यह शकुन्तला भी शोचनीय तथा दर्शनीय उभयरूपा दिखायी देती है॥ १२॥

The cheeks of Śakuntalā have emaciated (became lean), the thickness of the breasts of the chest totally disappeared. The middle portion of her body i.e. the loins or buttocks withered (faded), the shoulders have bent down. The complexion has became very pale. Thus, by the touches of emaciating breeze as appears Mādhavī creeper very attractive and deplorable accordingly this Śakuntalā too appears pleasing and pitiable due to sickness of passion. (12)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उभे—सहि! ज्जेव णिब्बंधो। सिणिद्धजणसंविभत्तं क्खु, दुक्खं सज्जवेअणं भोदि।
[सखि! अत एव निर्बन्धः। स्निग्धजनसंविभक्तं खलु दुःखं सह्यवेदनं भवति।]

राजा—

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम्।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रोत्तरश्रवणकातरतां गतोऽस्मि॥ १३॥

शकुन्तला—(निश्वस्य) अन्यस्य=युवाभ्यामपरस्य, कस्य=जनस्य (समीपे), कथयिष्यामि=न कस्यापीत्यर्थः। किन्तु आयासहेतुका=समदुःखसुखत्वात् परिश्रमहेतुभूता, वः=युष्माकम्, भविष्यामि। मत्सन्तापस्याशक्यप्रतिक्रियत्वात् युवयोः कृते दुःखप्रदा एव भविष्यामि। अत एव कथयामि इति भावः।

उभे—अनसूया-प्रियंवदे—सखि! अत एव=आवयोः समीपे कथनीयत्वादेव, निर्बन्धः=तत्रायासनिमित्तं श्रोतुमाग्रहः। खलु=यस्मात्, दुःखं=क्लेशः, स्निग्धजनेषु=वयस्यजनेषु, संविभक्तं=सम्यक् विभज्यार्पितं सत्, सह्या=सोढुं शक्या, वेदना=पीडा, उपभोगः, यस्य तत् सह्यवेदनं=शिथिलं, भवति।

राजा—अन्वयः—समदुःखसुखेन जनेन पृष्टा इयं बाला मनोगतम् आधिहेतुं न वक्ष्यति-किन्तु अनया विवृत्य सतृष्णं दृष्टोऽपि अत्र उत्तरश्रवणकातरतां गतोऽस्मि॥ १३॥

पृष्टा इति। समे=सदृशे, दुःखसुखे यस्य तथाभूतेन, जनेन=सखीद्वयेन, पृष्टा=जिज्ञासिता, इयं बाला=मुग्धा शकुन्तला, मनोगतम्=मनसि विद्यमानम्, आधेः=मनस्तापस्य, हेतुं=कारणम्, न वक्ष्यति=न कथयति। किन्तु अनया=शकुन्तलया, विवृत्य=वदनं परावृत्य, सतृष्णं=सस्पृहं, यथा स्यात्तथा बहुशः=असकृत्, दृष्टोऽपि=एवं वीक्षणेनाहमेवाधिहेतुरिति निश्चिन्वानोऽपि, अत्र=सखी-

---

शकुन्तला—(साँस भरकर) (तुम से नहीं तो) और किससे कहूँगी, किन्तु कहने से तुमलोगों को कष्ट होगा।

दोनों सखियाँ—सखि! इसीलिए तो हम आग्रह करती हैं; क्योंकि अपने प्रियजनों में दुःख बाँट देने से उसकी वेदना सह्य हो जाती है।

राजा—इसके सुख-दुःख में बराबर हिस्सा बँटाने वाली सखियों के कारण पूछने पर यह अपनी मनोगत पीड़ा का कारण नहीं बतायेगी, ऐसा नहीं है अर्थात् अवश्य बतायेगी। किन्तु उस समय इस मुग्धा बाला ने फिर-फिर कर कई बार मुझे देखा था। (अतः मैं ही

Śakuntalā—Friend! To whom else shall I tell? I shall now be a cause of trouble to you.

Both—Just for this reason indeed is our importunity. For, grief, shared with affectionate people becomes tolerable in its poignancy.

King—Questioned by persons who equally share her joy and sorrow, it can not be that this girl will not speak out the cause of her anguish, lying in her mind. Though longingly looked at by her

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—जदोपहुदि तवोवणरक्खिदा सो राएसी मम दंसणपधं गदा……। (इत्यर्द्धोक्तेन लज्जां नाटयति।) **[यतःप्रभृति तपोवनरक्षिता स राजर्षिर्मम दर्शनपथं गतः ।……]**

उभे—कधेदु कधेदु पिअसही। **[कथयतु कथयतु प्रियसखी।]**

शकुन्तला—तदा पहुदि तग्गदेण अहिलासेण एआवदवत्थम्हि संवुत्ता। **[ततः प्रभृति तद्गतेन अभिलाषेण एतावदवस्थाऽस्मि संवृत्ता।]**

उभे—दिठ्ठिआ दे अणुरूए वरे अहिलासो। अधवा साअरं उज्झिअ कहिं महाणईए पविसिदव्वं। **[दिष्ट्या ते अनुरूपे वरे अभिलाषः। अथवा सागरमुज्झित्वा कस्मिन् महानद्या प्रवेष्टव्यम्।]**

प्रश्ने, उत्तरस्य=प्रतिवचनस्य, श्रवणे=श्रवणविषये, कातरताम्=अधीरताम्, गतोऽस्मि=प्राप्तोऽस्मि। अत्र शालात्वेन मनोगतं बहिः प्रकाशयिष्यत्येवेति हेतुहेतुमद्भावात् काव्यलिङ्गम्। उत्तरार्द्धे विभावनाविशेषोक्त्योः सन्देहसङ्करः। वसन्ततिलकं नाम वृत्तम्॥ १३॥

भावार्थः—समदुःखसुखेन (सुखदुःखे समभागभूतेन) सखीद्वयेन जिज्ञासिताऽपि इयं बाला शकुन्तला मनसि विद्यमानं मनस्तापहेतुं न कथयति। किन्तु अनया (शकुन्तलया) त्वदनं परावृत्य सतृष्णं बहुशः वीक्षणेनाहमेवाधिहेतुरिति निश्चिन्वानोऽपि अत्र सखीप्रश्ने, उत्तरस्य श्रवणविषये कातरतां गतोऽस्मि। अधीरतया उत्तरं श्रोतुं कामये॥ १३॥

शकुन्तला—यतःप्रभृति=यत्कालमारभ्य, तपोवनरक्षिता=आश्रमरक्षकः, सः=प्रसिद्धः, राजर्षिः=मुनिकल्पो राजा दुष्यन्तः, मम, दर्शनपथं गतः=दृग्गोचरीभूतः (इत्यर्धोक्ते लज्जां नाटयति= व्रीडाम् अभिनयति)।

उभे—कथयतु कथयतु=प्रमोदातिशयोपलब्ध्या द्विर्वचनम्; प्रियसखी।

शकुन्तला—ततःप्रभृति=तत्कालमारभ्य, तद्गतेन=दुष्यन्तगतेन, अभिलाषेण=कामनया, एतावती=इदमाकारा, अवस्था=दशा, यस्याः सा तथाभूता, संवृत्तास्मि=प्राप्ताऽस्मि।

इसके रोग का कारण हूँ, यह जानते हुए भी) मैं इस समय इसका उत्तर सुनने के लिए अधीर हो रहा हूँ॥ १३॥

शकुन्तला—जब से तपोवन के रक्षक राजर्षि दृग्गोचर हुए हैं…… **(आधा वाक्य कहकर लज्जित होने का अभिनय करती है।)**

दोनों—प्रिय सखी! कहो-कहो।

शकुन्तला—उसी समय से उन राजर्षिपरक अभिलाषाओं के द्वारा मैं इस अवस्था को प्राप्त हुई हूँ।

---

many times by turning her face. But at this juncture I have become very anxious to hear what she says. (13)

Śakuntalā—Friend! from the very moment th[illegible] royal sage, the protector of the penance-grove, crossed the [illegible] of my sight *(Acts bashfulness, when half said)*

Both—Dear friend! tell, tell (what happened next).

Śakuntalā—From that moment I have been reduced to this condition owing to my desire having turned to him.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(सहर्षम्) श्रुतं यच्छ्रोतव्यम्।

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य॥ १४॥

शकुन्तला—ता जइ वो अणुमदं तदो तधा पउत्तिदव्वं, जधा तस्स राएसिणो अणुकंपणीआ होमि त्ति। अण्णधा सुमरेध मं। **[तद् यदि वामनुमतम् ततस्तथा प्रवर्त्तितव्यम्, यथा तस्य राजर्षेरनुकम्पनीया भवामीति। अन्यथा स्मरत माम्।]**

उभे—दिष्ट्या=भाग्यात्, ते=तव, अनुरूपे=योग्यपात्रे, अभिलाषः=आसक्तिः, जात इति शेषः। अथवा, महानद्या=गङ्गाप्रभृत्या, सागरं=महोदधिम्, उज्झित्वा=त्यक्त्वा, कस्मिन् प्रवेष्टव्यम्=न तदतिरिक्ते कस्मिंश्चिदपि इत्यर्थः।

राजा—(सहर्षम्=प्रसन्नतापूर्वकम्) यत् श्रोतव्यम्=श्रवणीयम् आसीत्, तत् श्रुतम्= आकर्णितम्। पुनः हर्षातिरेकेणात्मनः कृतार्थतासम्पादकं स्मरमभिनन्दयन् कथयति—

अन्वयः—तपात्यये जीवलोकस्य अभ्रश्यामः दिवस इव स्मर एव मे तापहेतुः (आसीत्), पुनरिदानीं स एव निर्वापयिता जातः॥ १४॥

स्मरेति। तपस्य=ग्रीष्मस्य अत्यये=अपगमे, तपात्यये=वर्षारम्भे, जीवलोकस्य= प्राणिवर्गस्य, अभ्रेण=मेघेन, श्यामः=कृष्णवर्णः, दिवस इव, स्मरः=कन्दर्प एव, मे=मम, तापस्य= सन्तापस्य, हेतुः=उत्पादकः, आसीत् इति शेषः, पुनरिदानीम्, सः=स्मर एव, निर्वापयिता= तापनिवृत्तिकारयिता, जात इति शेषः। अत्र—य एव तापहेतुः स एव तापनिर्वापयिता इति विरोधाभासः। केचित्तु—'तापजनकस्तु तापोपशमकः' इति विरुद्धकार्यसङ्घट्टनया विषमोऽलङ्कारः, श्रोती उपमा च। आर्य्या जातिः॥ १४॥

भावार्थः—यथा ग्रीष्मकालीनो दिवसः तीक्ष्णरश्मिसमधिकृततया जीवलोकस्य सन्तापमुत्पादयन् ग्रीष्मावसाने सच्छायः स एव दिवसः सन्तापोपशमने जनको भवति, तथैव स्मरः शकुन्तलोद्देशेन ममान्तस्तापमुत्पादयन्नपि अधुना मदुद्देशेन शकुन्तलायाः सन्तापं जनयन् ममाशा-पूरणाङ्कुरप्रकाशनेन सर्वं मेऽन्तस्तापमपाकरोति॥ १४॥

दोनों—सौभाग्य से अपने अनुरूप वर के लिए ही तुम्हारे मन में अभिलाषा उत्पन्न हुई है, अथवा समुद्र को छोड़कर महानदी और कहाँ जाकर विलीन हो सकती है?

राजा—(हर्षपूर्वक) जो सुनना चाहिए था, वह सुन लिया।

जो दिन ग्रीष्मकाल में संसार के प्राणियों को ताप से झुलसाता है, वही दिन ग्रीष्म के अन्त में मेघों से श्यामल होकर उस सन्ताप को दूर कर दिया करता है। ठीक उसी की भाँति पहले कामदेव ने स्वयं मेरे हृदय में सन्ताप उत्पन्न किया और अब स्वयं ही उसे मिटा भी दिया॥ १४॥

Both—Fortunately your desire, having turned to a suitable person or where can a great river disappears itself except in an ocean?

King—(Joyfully) What is worth hearing is heard.

Love himself was the cause of my affliction, he himself has become my cooler, as (becomes) a day dark with clouds at the end of summer, to the living beings. (14)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अहो विमर्शच्छेदि वचनम्। एतदेव कामफलम्, यत्नफलमन्यत्। एतावदवस्थाऽपि मां सुखयति।

प्रियंवदा—(जनान्तिकम्) अणसूए! दूरगदो से मणोरहो, अक्खमा इअं कालहरणस्स। **[अनसूये! दूरगतः अस्या मनोरथः, अक्षमा इयं कालहरणस्य।]**

शकुन्तला—तद्=अभिलषितत्वम्, यदि वां=युवयोः, अनुमतम्=अभीष्टम् (यदीदृशी मे अभिलाषा युवाभ्यां रोचते) ततः=तदा, तथा प्रवर्तितव्यम्=तेनैव रूपेण यतितव्यम्, यथा=येन प्रकारेण, तस्य राजर्षेः=मुनितुल्यस्य, अनुकम्पनीया=दयनीया, भवामीति। अन्यथा=युवयोरनुमततया यत्नाभावेन तस्याननुकम्पनीयत्वे सतीत्यर्थः। मां स्मरतम्=मरणस्य निश्चयात्मकत्वात् स्मृतिमात्रेणानुभवतम्।

राजा—अहो! विमर्शं=संशयं, छिनत्तीति विमर्शच्छेदि, (अस्याः) वचनम्=कथनम्। एतदेव=परस्परं प्रति परस्परानुरागोत्कर्ष एव उत एतत् पर्यन्तमेव, कामफलं=कामसाध्यम्, अन्यत्=परिणयादिना सङ्गमादिकम्, यत्नफलम्=चेष्टासाध्यम् (तथा च येन येन विना यत्नकरणे प्रवृत्तिर्नासीत् कामदेवेन तत्तत् निष्पादितमेव, इदानीं समागमायास्माभिर्यत्नविधानं साम्प्रतमिति भावः)। एतावदवस्थापि=मय्यनुरागप्रदर्शनमात्रपर्य्यन्ता अवस्था यस्याः सा, तथाभूताऽपि, मां सुखयति=अनुरागपूर्णोद्गारात् मां सुखं करोति।

प्रियंवदा—(जनान्तिकम्=अप्रकाशम्) अनसूये! अस्याः=शकुन्तलायाः, मनोरथः=अभिलाषः, दूरम्=अनासन्नम्, राजानमिति यावत्, गतः=विषयीचकार। अत एव यं कालहरणस्य=कालक्षेपस्य, अक्षमा=अनर्हा (कालक्षेपे हि सखी अस्माकं म्रियेतैवेति)।

शकुन्तला—यदि तुम दोनों को मेरा चुनाव पसन्द है तो—ऐसा यत्न करो, जिससे मैं उन राजा की कृपापात्री बन जाऊँ, अन्यथा मेरा स्मरण करना (अर्थात् मैं उनके वियोग में जीवित नहीं बचूँगी)

राजा—ओह, इसके वचन सब सन्देहों को दूर करने वाले हैं। कामदेव का वास्तविक फल यही है। प्रयत्न का (संगमरूप) फल दूसरा है। यद्यपि यह अतीव विषमावस्था में पहुँच गई है फिर भी मुझे सुख ही देती है।

प्रियंवदा—**(कान में)** अनसूया! इसकी अभिलाषा बहुत दूर तक पहुँच चुकी है अतः यह समय नहीं बिता सकेगी।

***Śakuntalā*—**If my selection is approved by you then take necessary steps, so that I may be commiserated by that royal sage otherwise, certainly you have to weep for me.

***King*—**The declaration removes all doubts. This much is the result of kāma (cupid) and the rest depends on effort. Though she had reached a miserable condition, yet gives me pleasure too.

Priyaṁvadā*—*(Aside) Anasūyā! far advanced (in love), this Śakuntalā is incapable of (bearing any) loss of time.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनसूया—पिअंबदे! को णु उवाओ भवे, जेण अबिलंबिदं णिहुदं च सहीए मणोरहं सम्पादेम्ह। **[प्रियंवदे! को नु उपायो भवेत्, येन अविलम्बितं निभृतञ्च सख्या मनोरथं सम्पादयावः।]**

प्रियंवदा—णिहुदं त्ति चिंतणीअं, सिग्घं त्ति ण दुक्करं। **[निभृतमिति चिन्तनीयम्, शीघ्रमिति न दुष्करम्।]**

अनसूया—कधं विअ? **[कथमिव?]**

प्रियंवदा—णं सो वि राएसी इमस्सिं जणे सिणिद्धदिट्ठिआ सूइदाहिलासो इमेसुं दिअसेसुं पजाअरकिसो विअलक्खीअदि। **[ननु सोऽपि राजर्षिः अस्मिन् जने स्निग्धदृष्ट्या सूचिताभिलाषः एषु दिवसेषु प्रजागरकृश इव लक्ष्यते।]**

अनसूया—नुरिति प्रश्ने, को उपायो भवेत्, येन=उपायेन, अविलम्बितम्=शीघ्रम्, निभृतञ्च=गुप्तञ्च, यथा भवति तथा, मनोरथं=सख्या मनोरथविषयीभूतं दुष्यन्तसङ्गमम्, सम्पादयावः= सफलतां नयावः।

प्रियंवदा—निभृतं=गुप्तम्, इति चिन्तनीयम्=विचारणीयम्, शीघ्रमिति=शीघ्रं सम्पादनम्, न दुष्करम्=कठिनम्, अनायाससाध्यम्।

अनसूया—कथमिव?=कीदृशमेतत्?

प्रियंवदा—नन्वनु प्रश्ने, सोऽपि राजर्षिः=दुष्यन्तोऽपि, अस्मिन् जने=प्रियसख्यां शकुन्तलायाम्, स्निग्धदृष्ट्या=प्रणयदृष्ट्यर्पणेन, सूचितः=व्यंजितः, अभिलाषः=अनुरागः, यस्य सः तादृशः, प्रजागरेण=रात्रिजागरणात्, कृशः=क्षीणाङ्ग इव, लक्ष्यते=परिदृश्यते। दुष्यन्तस्यापि तस्यामासक्तिवशात् शीघ्रता न दुःसाध्येति भावः।

अनसूया—प्रियंवदा! कौन-सा उपाय किया जाय, जिससे गुप्त रीति से शीघ्र इसकी इच्छा की पूर्ति हो सके।

प्रियंवदा—गुप्त रूप से ही कठिन है किन्तु शीघ्र कठिन नहीं है।

अनसूया—कैसे?

प्रियंवदा—वह राजर्षि भी अपनी स्निग्ध दृष्टि द्वारा अपनी अभिलाषा प्रगट कर चुके हैं और इधर कई दिनों से रात्रि में जागते रहने से वे भी कमजोर से दीखते हैं।

***Anasūyā*—**Priyaṁvadā! But what would be the means by which we could fulfil the desire of our friend without delay and secretly.

***Priyaṁvadā*—**As for 'secretly', it may require thought, as for quickly' it can easily be done.

***Anasūyā*—**How possibily?

***Priyaṁvadā*—**That royal sage, whose longing for this (Śakuntalā) is indicated by his affectionate look, appears these days to be reduced through regualar wakefulness.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(आत्मानमालोक्य) सत्यमित्थम्भूत एवास्मि। तथाहि—

अशिशिरतैरन्तस्तापैर्विवर्णमलीमसं
निशि निशि भुजन्यस्तापाङ्गप्रवर्त्तिभिरश्रुभिः।
अनतिलुलितज्याघाताङ्कात् मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्य्यते॥ १५॥

राजा—(आत्मानम्=स्वशरीरम्, आलोक्य=दृष्ट्वा) आत्मावलोकनेन प्रियंवदोक्तं याथातथ्यं विभाव्याह—सत्यम्=सत्यमेव, इत्थम्भूतः=ईदृशीमवस्थामापन्नः प्रजागरकृश एवास्मि संवृत्तः। तथाहि—

अन्वयः—अन्तस्तापैः अशिशिरतरैः निशि निशि भुजन्यस्तापाङ्गप्रवर्त्तिभिः अश्रुभिः विवर्णमलीमसं कनकवलयम् अनतिलुलितः ज्याघाताङ्कात् मणिबन्धनात् स्रस्तं स्रस्तं मया मुहुः प्रतिसार्य्यते॥ १५॥

अशिशिरेति। अन्तस्तापैः=अन्तस्थमदनोत्तापैः, अशिशिरतरैः=अत्यन्तमुष्णैः, निशि निशि=तद्दर्शनादारभ्य सर्वासु रात्रिषु, भुजे=उपाधानीकृते वामबाहौ, न्यस्तात्=स्थापितात्, अपाङ्गात्=नेत्रप्रान्तात्, प्रवर्त्तिभिः=निर्गच्छद्भिः, अश्रुभिः=नयनवारिभिः, विवर्णं=कुत्रचिदंशे कान्तिरहितं, मलीमसं=कुत्रचिदंशे मलिनञ्च, यद्वा—विवर्णं=विकृतवर्णम्, अत एव मलीमसं=मलिनीभूतम्, कनकस्य वलयं कनकवलयम्=सुवर्णकटकम्, अनतिलुलितः=कनकवलयावरणेनानभिव्यक्तः, ज्यायाः=मौर्व्याः, आघातेन अङ्कः=चिह्नं, यत्र तत् तस्मात् ज्याघाताङ्कात्, मणिर्बध्यतेऽस्मिन्निति मणिबन्धनं, तस्मात् मणिबन्धनात्=हस्तप्रकोष्ठभागात्, स्रस्तं स्रस्तं=गलितं गलितं (अतिकृशतया हस्तप्रकोष्ठदेशमागतम्), मया=दुष्यन्तेन, मुहुः=पुनः पुनः, प्रतिसार्य्यते=स्वस्थानस्थं क्रियते। अत्र स्वभावोक्तिः काव्यलिङ्गञ्च। हरिणी वृत्तम्॥ १५॥

भावार्थः—अन्तस्तापैः, अत्यन्तमुष्णैः तद्दर्शनादारभ्य सर्वासु रात्रिषु भूपृष्ठशयने उपधानीकृते वामबाहौ स्थापितात् नेत्रप्रान्तभागाद् प्रवर्त्तिभिः अश्रुभिः विकृतवर्णमत एव मलिनीभूतम्,

---

राजा—(**अपने आप को देखकर**) सत्य ही मैं ऐसा ही हो गया हूँ; क्योंकि—

रात्रि में हाथ का तकिया बनाकर सोने से हार्दिक सन्ताप के कारण नेत्रकोण से प्रवाहित होने वाले आँसुओं से मणिबन्ध का रंग ही बदल गया है। धनुष की डोरी खींचने से मणिबन्ध में पड़ा हुआ चिह्न सोने के कड़े के कारण दिखाई नहीं देता। दुर्बलता के कारण सोने का कड़ा बार-बार खिसक जाता है, जिसे मुझे फिर से उसके स्थान पर पहुँचाना पड़ता है (इन सब कारणों से जान पड़ता है कि मैं सचमुच दुर्बल हो गया हूँ)॥ १५॥

King—Indeed, I have become just so. For—

This golden bracelet, which ordinarily did not touch the scar created by the bow string, is being repeatedly pushed back by me from the wrist, as it now and then slips down there. The bracelet which has its jewels, now rendered pale by the tears, hot on account of internal anguish and flowing night after night from the corner of my eye resting on my left arm. (15)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियंवदा—(विचिन्त्य) हला! मअणलेहणं दाणिं से करीअदु, अहं तं सुमणोगोविदं कदुअ देवदासेवावदेसेण तस्स रण्णो हत्थं पावइस्सं। **[हला! मदनलेखनमिदानीमस्याः क्रियताम्, अहं तत् सुमनोगोपितं कृत्वा देवतासेवापदेशेन तस्य राज्ञो हस्तं प्रापयिष्यामि।**

अनसूया—सहि! रोअदि मे सुउमारो एसो पओओ। किं वा सउंतला भणादि? **[सखि! रोचते मे सुकुमार एष प्रयोगः। किं वा शकुन्तला भणति?]**

शकुन्तला—सहीणिओओ वि विकप्पीअदि? **[सखीनियोगोऽपि विकल्प्यते?]**

प्रियंवदा—तेण हि अत्तणो उवण्णासाणुरूअं चिंतेहि ललिदपदावलिबंधं गीदिअं। **[तेन हि आत्मन उपन्यासानुरूपां चिन्तय ललितपदावलिबन्धां गीतिकाम्।]**

कनकवलयं कनकवलयावरणेनानभिव्यक्तः ज्याघाताङ्कात् मणिबन्धनात् अतिकृशतया हस्तप्रकोष्ठ-देशमागतं (वलयम्) मया मुहुः प्रकोष्ठरूप-स्वस्थानस्थं क्रियते॥ १५॥

प्रियंवदा—(विचिन्त्य=विचार्य) हला=सखि! अस्याः=शकुन्तलायाः, मदनलेखनम्=आत्मनः कामाविर्भावव्यञ्जिका पत्रिका, क्रियताम्=विधीयताम्, अहं, तत्=पत्रम्, सुमनोभिः=पुष्पैः, गोपितं=संवृतं कृत्वा, देवतासेवापदेशेन=देवार्चनव्याजेन, तस्य=पूर्वोक्तस्य, राज्ञः=दुष्यन्तस्य, हस्तं=करं, प्रापयिष्यामि।

अनसूया—सखि! रोचते=प्रीतिमुत्पादयति, मे=मह्यम्, एषः=त्वयोक्तः, सुकुमारः=मृदुलः, अनायाससाध्यः, प्रयोगः=प्रतिविधानम्। किं वा शकुन्तला भणति=शकुन्तलायै राचते न वायं प्रयोगः।

शकुन्तला—सख्योः=युवयोः, नियोगः=आदेशोऽपि, विकल्प्यते=कर्त्तव्योऽकर्तव्यो वेति द्वैधीक्रियते? नैवेति भावः।

प्रियंवदा—तेन हि=अस्मच्चिन्तितोपाये तव सम्मतत्वेनैव, उपन्यासानुरूपां=योजनानुरूपाम्, ललिता=सुकोमला, माधुर्य्यादिगुणप्रधाना, या पदावलिः=पदपंक्तिः, तया बन्धः=रचना,

---

प्रियंवदा—(सोचकर) सखी! इस (उद्देश्य की पूर्ति के लिए) तुमं एक कामलिपि लिखो। मैं उसे फूलों के भीतर छिपाकर देवपूजा के बहाने से राजा के पास पहुँचा दूँगी।

अनसूया—सखी! मुझे यह सुकुमार-प्रयोग (कोमल उपाय) अच्छा लगता है किन्तु शकुन्तला क्या कहती है?

शकुन्तला—सखी के निर्देश पर भी क्या कुछ विचार करूँगी?

प्रियंवदा—यदि ऐसा है तो अपनी अवस्था के अनुरूप एवं सुललित पदों वाली एक गीति सोचो।

Priyaṁvadā—(Thinking) Dear! Let a love-letter be prepared for him. This, after concealing under flowers, I shall deliver it into his hand, under the pretext of (its being) an offering presented to the deity.

***Anasūyā*—**I like this delicate measure. But waht does Śakuntalā say?

***Śakuntalā*—**Will your command be doubted?

***Priyaṁvadā*—**Well, then just think of some beautiful compositions, introduced by an allusion to your self.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—चिंतेमि, किन्तु अवहीरणाभीरुअं वेवदि मे हिअअं। [**चिन्तयामि, किन्तु अवधीरणाभीरुकं वेपते मे हृदयम्।**]

राजा—(विहस्य)

अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु! यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्॥ १६॥

यस्यास्तां ललितपदावलिबन्धाम्, गीतिकाम्=गीतिम्, चिन्तय=निरूपय (तां हि गीतिकां राजर्षेर्हस्तं व्याजेन प्रापयिष्यामीत्याशयः)।

शकुन्तला—चिन्तयामि, किन्तु अवधारणाभीरुकं=अवज्ञाभीतं सत्, मे=मम, हृदयम्, वेपते=कम्पते।

राजा—(विहस्य)

अन्वयः—हे भीरु! यतः अवधीरणां विशङ्कसे सोऽयं ते सङ्गमोत्सुकः तिष्ठति। हि प्रार्थयिता श्रियं लभेत वा न वा परन्तु ईप्सितः श्रिया कथं दुरापः भवेत्॥ १६॥

अयमिति। हे भीरु=वृथा भीतितरले! यतः=यस्मात्, अवधीरणाम्=अवहेलाम्, विशङ्कसे= वितर्कयसे, सोऽयं जनः=दुष्यन्तः, ते=तव, सङ्गमे=सम्मेलने, उत्सुकः=उत्कण्ठितः सन्, तिष्ठति= त्वदाज्ञामात्रमपेक्षते। तथाहि—प्रार्थयिता=प्रार्थी (श्रीकामो जनः), श्रियं=लक्ष्मीम्, लभेत वा= प्राप्नुयाद्वा, न वा=न लभेद्वा, परन्तु ईप्सितः=आप्तुमिष्टः श्रीकामो जनः, श्रिया=लक्ष्म्या, कथं दुरापः=दुर्लभः भवेत्॥ १६॥

भावार्थः—हे अवधीरणाभयशीले शकुन्तले! यस्मात् जनात् त्वम् अवहेलां विशङ्कसे, सोऽयं जनः तव सङ्गमोत्सुकः सन् त्वदाज्ञामात्रमपेक्षते। तथाहि—श्रीकामो जनः श्रियं लभेत वा न वा परन्तु ईप्सितः (श्रीकामो) जनः श्रिया कथं दुरापः भवेत्। त्वां प्रार्थयितुर्मे त्वं दुर्लभैव न पुन-स्त्वया प्रार्थ्यमानोऽहं ते दुर्लभः, अतो मम सुलभत्वेन तव तु दुर्लभत्वेन च मत्तोऽवधीरणा मा शङ्क्य, परन्तु वैपरीत्येन मम त्वत्तोऽवधीरणा सम्भाव्यैवेत्याशयः। अत्र अर्थान्तरन्यास अलङ्कारः, वंशस्थ-विलं वृत्तञ्च॥ १६॥

शकुन्तला—सोचूँगी तो सही, परन्तु तिरस्कार के भय से मेरा हृदय काँपता है।

राजा—(हँसकर) ओ भीरु! तुम जिसके द्वारा अपमान की शङ्का करती हो, वह स्वयं तुमसे मिलने के लिए उत्कण्ठित होकर खड़ा है। प्रार्थी व्यक्ति लक्ष्मी को पाता भी है और नहीं भी पाता, किन्तु लक्ष्मी जिसे स्वयं पाना चाहेगी भला वह उसके लिए दुर्लभ कैसे हो सकेगा?॥ १६॥

***Śakuntalā*—**Dear, I shall think out. But my heart trembles for fear of repudiation.

King*—*(With joy) Here stands he, eager for union with you from whom, O timid one! you apprehend repudiation. The suitor may or may not obtain riches (Goddess Laxmi) but how can the wished one be difficult for Lamxi to obtain. (16)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि च—

अयं स यस्मात् प्रणयावधीरणामशङ्कनीयां करभोरु! शङ्कसे।
उपस्थितस्त्वां प्रणयोत्सुको जनो न रत्नमन्विष्यति मृग्यते हि तत्॥ १७॥

सख्यौ—अइ अत्तगुणावमाणिणि? को णाम संदावणिव्वाणहेतुअं सारदीयं ज्जोण्णं आदवत्तेण णिवारेदि? **[अयि आत्मगुणावमानिनि! को नाम सन्तापनिर्वाणहेतुकां शारदीं ज्योत्स्नाम् आतपत्रेण निवारयति।]**

अपि च=अन्यच्च—

अन्वयः—हे करभोरु! यस्मात् अशङ्कनीयां प्रणयावधीरणां शङ्कसे सोऽयं प्रणयोत्सुकः त्वाम् उपस्थितः। हि रत्नं न अन्विष्यति किन्तु तत् मृग्यते॥ १७॥

अयं सेति। करभस्य=करिशावकस्य, ऊरू इवोरू यस्याः सा तत्सम्बुद्धौ हे करभोरु! यस्मात्=जनात्, अशङ्कनीयाम्=शङ्काया अविषयीभूताम्, प्रणयस्य=रतिप्रार्थनायाः, अवधीरणाम्=अवहेलाम्, शङ्कसे=सन्दिह्यसि, सोऽयं जनः=दुष्यन्तः, प्रणयोत्सुकः=त्वयि रतिप्रार्थनार्थमुत्सुकः सन्, त्वामुपस्थितः=त्वत्समीपमेवागतः, हि=यस्मात्, रत्नं=मणिः, न अन्विष्यति=ग्रहीतारं न मृगयते, किन्तु=तद्रत्नमेव, मृग्यते=अन्विष्यते, ग्रहीतृभिरित्यर्थः॥ १७॥

अत्रापि अर्थान्तरन्यासोऽलङ्कारः वंशस्थविलं वृत्तञ्च॥ १७॥

भावार्थः—हे करभोरु! यस्माज्जनात् प्रणयावहेलां शङ्कसे, सोऽयं जनः (दुष्यन्तः) प्रणयोत्कण्ठितः सन् त्वत्समीपमेवागतः। हि रत्नं न कदापि ग्रहीतारं मृगयते किन्तु तद्रत्नमेव ग्रहीतृभिरन्विष्यते,अत एवावहेलाशङ्का वृथैवेति भावः॥ १७॥

सख्यौ—अनसूया-प्रियंवदे चेति, अयीति सम्बोधने, आत्मगुणावमानिनि=स्वगुण-गौरवानुभिज्ञे! (त्वद्गुणैरेव स क्रीतोऽतोऽवधीरणाशङ्काऽपि नेति भावः) को नाम=को नु खलु लोकः (न कोऽपीत्यर्थः), सन्तापनिर्वाणहेतुकाम्—सन्तापस्य=ग्रीष्मतापस्य, निर्वाणे=उपशमे, हेतुरेव हेतुका तां हेतुकां=हेतुभूताम्, शरदि भवां शारदीम्=शरत्कालसम्बन्धिनीम्, ज्योत्स्नां=

और भी—

हे करभोरु! तुम जिस व्यक्ति के द्वारा सन्देह के अयोग्य प्रार्थना-भङ्ग की आशङ्का करती हो, यह वही व्यक्ति तुम से प्रणय-निवेदन करने के लिए उत्कण्ठित होकर खड़ा है। वस्तुतः रत्न किसी को भी नहीं ढूँढ़ता बल्कि इच्छुक व्यक्ति स्वयं उसे ढूँढ़ता है॥ १७॥

दोनों सखियाँ—ओ अपनी गुणगरिमा से अनभिज्ञ शकुन्तले! संसार में भला ऐसा कौन होगा जो सन्ताप को दूर करने वाली चन्द्रमा की चाँदनी को छतरी लगाकर अपने ऊपर पड़ने से रोके।

Here stands he, eager for espousing with you from whom O' possessor of excellent thigh, you apprehend doubtless repudiation. Actually jems never wander in search of a buyer, but a desirous himself makes affort to get it. (17)

Friends—O slighter of your excellences, who possibly would ward off, with the help of an umbrella, the autumnal moon-light, that cools the body.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(सस्मितम्) णिओइदाम्हि। (इत्युपविष्टा चिन्तयति।) [**नियोजिताऽस्मि।**]

राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। यतः—

उन्नमितैकभ्रूलतामाननमस्याः पदानि रचयन्त्याः।
पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन॥ १८॥

शकुन्तला—हला! चिंतिदा मए गीदिआ। असण्णिहिदाणि उण लेहणसाहणाणि।
[**हला! चिन्तिता मया गीतिका। असन्निहितानि पुनः लेखनसाधनानि।**]

चन्द्रिकाम्, आतपत्रेण=क्षत्रेण, निवारयति=निषिध्यति। (दुष्यन्तश्चन्द्रिकामिव परमसुन्दरीं त्वां स्वकामसन्तापोपशमैककारणभूतां प्राप्य स्वप्रेऽप्यवज्ञया न प्रत्याख्यास्यत इत्याशयः।)

शकुन्तला—(सस्मितम्=समन्दहासम्) नियोजिताऽस्मि=पूर्वं नियोगमात्रं कृतमिदानीन्तु शङ्कापरिहारपुरस्कारेण सोपपत्तिकं मदनलेखविषये प्रवर्त्तिताऽस्मि इत्याशयः। (इति=एवं, उपविष्टा=कुसुमशय्यात उत्थाय, चिन्तयति=मदनलेखरचनामात्मनि मनो निदधाति।)

राजा—स्थाने खलु=युक्तमेव, विस्मृतः निमेषो येन तेन विस्मृतनिमेषेण, चक्षुषा=नेत्रेण, प्रियां=मनोरथप्रियां शकुन्तलाम्, अवलोकयामि=पश्यामि। यतः—

अन्वयः—पदानि रचयन्त्याः अस्याः उन्नमितैकभ्रूलताम् आननं पुलकाञ्चितेन कपोलेन मयि अनुरागं कथयति॥ १८॥

उन्नमितैकेति। पदानि=स्मरलेखयोग्यान्, रचयन्त्याः=स्मरलेखे निवेशयन्त्याः, अस्याः=शकुन्तलायाः, उन्नमिता=उदञ्चिता, एका भ्रूलता यस्य तत् उन्नमितैकभ्रूलताम्, आननम्=अनतिजीवत्यनेनेत्यन्वर्थं मुखम्, पुलकाञ्चितेन=रोमाञ्चाकलितेन, कपोलेन=गण्डस्थलेन, मयि=मद्विषये, अनुरागं=प्रीतिम्, कथयति=सूचयति। अत्र अनुमानालङ्कारः, केचित्तु सन्देहसङ्करम्, अपरे तु स्वभावोक्तिश्च। आर्य्या जातिः॥ १८॥

भावार्थः—स्मरलेखयोग्यान् सुबन्तादिप्रयोगान् ऊहापोहाभ्यां मदनलेखे निवेशयन्त्याः अस्याः शकुन्तलायाः उन्नमितैकभ्रूलताम् आननं, रोमाञ्चाकलितेन कपोलेन मद्विषये प्रीतिं कथनेनेव स्पष्टं प्रकाशयति॥ १८॥

शकुन्तला—(**मुस्कराकर**) तो मैं इस काम में लगा दी गई। (**बैठकर सोचती है**)

राजा—मैं जो अपने प्रियतमा को टकटकी लगाकर देख रहा हूँ वह उचित ही है; क्योंकि यह कामपत्र के लिए पदरचना कर रही है और इसकी एक भौं ऊँची उठी हुई है। इस दशा में इसका मुख रोमाञ्चित कपोल द्वारा मेरे प्रति अनुराग प्रगट कर रहा है॥ १८॥

शकुन्तला—सखी! मैंने गीतिका सोच ली है, किन्तु लेखन-सामग्री पास में नहीं है।

Śakuntalā—*(Smilingly)* I am now made busy by you. *(Sits up and meditates)*

King—Exactly, indeed, do I gaze at my beloved with eyes that have forgotten winking. Why so?

Her face, as she composes the words, with one creeper like eye-brow raised, discloses her affection for me with the horripilated cheek. (18)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियंवदा—णं इमस्सिं सुओदरसुउमारे णलिणीवत्ते पदच्छेदभत्तीए णहेहिं आलिहीअदु। [**नन्वस्मिन् शुकोदरसुकुमारे नलिनीपत्रे पदच्छेदभक्त्या नखैरालिख्यताम्।**]

शकुन्तला—(यथोक्तं रूपयित्वा) हला! सुणध दाव संगदत्था ण वत्ति। [**हला! शृणुतं तावत् सङ्गतार्था न वेति।**]

उभे—अवहिद म्ह। [**अवहिते स्वः।**]

शकुन्तला—(वाचयति)

तुज्झ ण आणे हिअअं, मम उण मअणो दिवा वि रत्तिं वि।
णिक्किव! दावइ बलिअं, तुह हत्थमणोरहाइं अंगाइं॥ १९॥

शकुन्तला—हला! चिन्तिता=विचारिता (चिन्तयाऽऽरचिता), मया=शकुन्तलया, गीतिकां=ललितपदावलिबन्धं गीतम्। असन्निहितानि=असन्निकटवर्त्तीनि, लेखनसाधनानि=मसि-लेखन्यादीनि (अतः केनोपायेन गीतिकां पत्राङ्कितां करोमीति भावः)।

प्रियंवदा—ननुरनुज्ञायाम्, अस्मिन्=तव पुरःस्थिते, शुकस्य=तन्नाम पक्षिणः, उदरमिव=क्रोडदेशवत्, सुकुमारे=सुकोमले, नलिनीपत्रे=कमलिनीपत्रे, नखैः=नखकोटिभिः, पदच्छेद-भक्त्या—पदानां छेदः=विच्छेदः, पृथक् पृथक् पदविभाग इति यावत्, तद्रूपा या भक्तिः=रचनाविशेषः, तया स्थाने स्थाने=पदं विच्छेदं कृत्वेत्यर्थः, लिख्यतां सा गीतिका इति।

शकुन्तला—(यथोक्तं=प्रियंवदोपदिष्टानुरूपम्, रूपयित्वा=नाट्येन नखैर्लिखित्वा) हला प्रियसखि! शृणुतं=युवां श्रुत्वा परीक्षेथाम्, तावत्, सङ्गताः=युक्ताः, अर्थाः=वाच्यादयः, यस्याः सा सङ्गतार्था, न वा=असङ्गतार्था वेत्यर्थः।

उभे—अवहिते=श्रवणाय दत्तावधाने, स्वः=भवावः।

शकुन्तला—(वाचयति=पठति)

प्रियंवदा—अच्छा तो इस तोते के पेट की भाँति कोमल कमलपत्र पर एक-एक पद अलग कर नाखून से (वह गीतिका) लिखो।

शकुन्तला—(**कहे हुए ढंग से करके**) सखी! सुनो (और बताओ) इसका अर्थ सङ्गत भी है या नहीं?

दोनों सखियाँ—हम ध्यान से सुन रही हैं।

शकुन्तला—(**पढ़ती है**)

हे निर्दयी! मैं तुम्हारे मन की दशा तो नहीं जानती, किन्तु मैंने अपनी समस्त

***Śakuntalā*—Dear friends! the substance of a song is thought out by me. But materials of writings are not available or not really at hand.

***Priyaṁvadā*—You, then engrave the letters with your nails on this lotus-leaf, delicate like a parrot's breast.

***Śakuntalā*—*(Gesticulating as said)* Friends! now hear whether the meaning is consistent or not.

***Both*—We are attentive.

***Śakuntalā*—*(Reads)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[तव न जाने हृदयं मम पुनर्मदनो दिवाऽपि रात्रिमपि।
निष्कृप! तापयति बलीयस्तव हस्तमनोरथानि अङ्गानि॥ १९॥]

राजा—अवसरः खल्वयमात्मानं दर्शयितुम्। (सहसोपसृत्य)

तपति तनुगात्रि! मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥ २०॥

अन्वयः—हे निष्कृप! तव हृदयं न जाने पुनः मदनः तव हस्तमनोरथानि मम अङ्गानि दिवाऽपि रात्रिमपि बलीयः तापयति॥ १९॥

तवेति। हे निष्कृप=दयाशून्य! तव=भवतः, हृदयं=हृदयस्थरहस्यं, चेतसः दशाम्, न जाने=नावगच्छामि (तव चित्तं मय्यनुरक्तं न वेति, मदनो ममेव तव हृदयं सरुजं करोति न वेति च नावगच्छामि), पुनः=किन्तु, मदनः=मन्मथः, तव हस्ते मनोरथः=अभिलाषः, येषां तानि तव हस्त-मनोरथानि, मम अङ्गानि, दिवाऽपि=समग्रदिवसेऽपि (दिवसमपि व्याप्य), रात्रिमपि= रजनीमपि व्याप्य, निरन्तरमेव, बलीयः=अतिबलवत्, तापयति=व्यथयति। अत्र श्लेषानुप्रासौ, विप्रलम्भः शृङ्गारो रसः। गीतिर्नामच्छन्दः ("आर्य्या पूर्वार्द्धसमं यस्या अपरार्द्धमपि च हंसगते। छन्दो-विदस्तदानीं गीतिंताममृतवाणि भाषन्ते"॥— श्रुतबोध ४४)॥ १९॥

भावार्थः—हे दयाशून्य! तव चित्तं मय्यनुरक्तं न वेति, मदनो ममैव तव हृदयमपि सरुजं करोति न वा इति च नावगच्छामि। किन्तु कामदेवः तव हस्तमनोरथानि मम अङ्गानि सततमेव भृशं तापयत्येव॥ १९॥

राजा—अवसरः=समयः, खलु=इति निश्चयेन, आत्मानं दर्शयितुम्=स्वं प्रकटीकर्त्तुम्। (सहसा=अतर्कितम्, उपसृत्य=नायिकासमीपम् आगत्य) (अवसरान्वेषी नायकोऽवसरं प्राप्य नायिकाकथनोत्तरदानव्याजेन स्वकीयामवस्थां निवेदयति।)

अन्वयः—तनुगात्रि! मदनः त्वाम् अनिशं तपति पुनः मां दहत्येव। हि दिवसः यथा शशाङ्कं ग्लपयति तथा कुमुद्वतीं न॥ २०॥

तपतीति। तनूनि=कृशानि, गात्राणि यस्यास्तत्सम्बुद्धौ हे तनुगात्रि! मदनः=स्मरः, त्वाम्

अभिलाषा तुम्हारे हाथों में सौंप दी है। ऐसी अवस्था में कामदेव मेरे सारे अङ्गों को दिन-रात बहुत व्यथा पहुँचाता है॥ १९॥

राजा—प्रकट होने का यही अवसर है (**सहसा सामने आकर**)

ओ दुर्बल शरीरवाली! तुम्हें तो कामदेव दिन-रात केवल सन्ताप ही देता है किन्तु मुझे तो वह (सर्वथा) जलाये ही डालता है। दिन जिस प्रकार चन्द्रमा को मलिन करता है, उस प्रकार कुमुदिनी को नहीं॥ २०॥

I know not your heart; but the god of love, O ruthless one! exceedingly heats or gives pain, even by day and at night always, the limbs of mine, whose desires are centred in you only. (19)

King—This is the proper time is disslore myself *(Hastily approaching)*

You, O slender-limbed one! the god of love troubles you; but he incessantly burns me. The day does not indeed so cause the lotus-plant to fade as it does the moon. (20)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सख्यौ—(विलोक्य सहर्षमुत्थाय) साअदं जधासमीहिदफलस्स अविलंबिणो मणोरहस्स। [**स्वागतं यथासमीहितफलस्य अविलम्बिनो मनोरथस्य।**]

शकुन्तला—(उत्थातुमिच्छति)

राजा—अलमलमायासेन।

सन्दष्टकुसुमशयनान्याशु विमर्दितमृणालवलयानि।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति॥ २१॥

अनिशं=सततं, दिवापि रात्रिमपि चेति भावः, तपति=सन्तापयति, पुनः=किन्तु, मां=मां दुष्यन्तं तु, दहत्येव=दग्धीकरोत्येव, हि=तथाहि, दिवसः=वासरः, यथा=येनैव रूपेण, शशाङ्कं=चन्द्रमसं, ग्लपयति=ग्लानिं नयति (शोभारहितं करोति), तथा=तेन रूपेण, कुमुद्वतीम्=कुमुदिनीम्, न ग्लपयति=वैवर्ण्यादिकं न प्रापयति। अत्र दृष्टान्तालङ्कारः, शशाङ्ककुमुद्वतीरूपकर्मद्वयाभिधानात् तुल्ययोगिता च, प्रतिवस्तूपमालङ्कार इति केचित्। आर्य्या जातिः॥ २०॥

भावार्थः—समानसन्तापदायको दिवसो यथा चन्द्रमसो वैवर्ण्यादिकं करोति तथा तत्प्रेयस्याः कुमुदिन्या न करोति, तथैव मदनोऽपि त्वां तु अनिशं सन्तापमात्रं ददति किन्तु मां तु दग्धीकरोत्येव॥ २०॥

सख्यौ—(विलोक्य=दृष्ट्वा, सहर्षमुत्थाय=राज्ञः सम्मानप्रदर्शनाय उत्थानं विधाय आसनादिति शेषः) यथासमीहितं=यथाभिलषितं, फलं=शकुन्तला-दुष्यन्तयोः सङ्गमरूपं सम्भाव्यमानं फलं, यस्मात्तथाभूतस्य, अविलम्बिनः=उपायचिन्तनकाल एवाविलम्बमुपनतस्य, मनोरथस्य=अभिलाषभूतस्य, भवत इत्यर्थः, स्वागतम्=शुभागमनम्।

शकुन्तला—(उत्थातुमिच्छति=राज्ञः सम्मानप्रदर्शनाय उत्थातुम् आरभते।)

राजा—आयासेन=उत्थानपरकपरिश्रमेण, अलम्=पर्याप्तम्, अलमलमिति अत्यन्तनिषेधे द्विरुक्तिः (सुखमुपविशेति भावः)।

अन्वयः—सन्दष्टकुसुमशयनानि आशु विमर्दितमृणालवलयानि अत एव गुरुपरितापानि ते गात्राणि उपचारं नार्हन्ति॥ २१॥

सन्दष्टेति। सन्दष्टं=ग्लानतया स्वेदार्द्रतया च संश्लिष्टं, कुसुमशयनं=पुष्पशय्या, येषु वा

सखियाँ—(देखकर और हर्षपूर्वक उठकर) जिनके द्वारा अपनी कामना पूरी हो सकती है, उन्हीं आपको सहसा आया हुआ देखकर (हम केवल यही कह सकती हैं) आपका स्वागत है।

शकुन्तला—(उठना चाहती है।)

राजा—बस-बस प्रयास न करो।

जिनके संचालन से पुष्पों की शय्या मर्दित हो गई है तथा जिनका मृणालकंकण भी

***Friends**—(Observing and rising with joy)* Welcome to (the object of our friends) desire which makes no delay (in arriving).

***Śakuntalā**—(Desires to stand or rise)*

King—Off-off with your effort.

Your limbs, which have the bed of flowers sticking on to them, which have quickly crushed bracelets of lotus-stalks and

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(ससाध्वसमात्मगतम्) हिअअ! तधा उत्तम्मिअ दाणिं ण किंपि पडिवज्जसि। [**हृदय! तथा उत्तम्य इदानीं न किमपि प्रतिपद्यसे।**]

अनसूया—इदो सिलादलेक्कदेसं अणुगेह्णदु महाभाओ। [**इतः शिलातलैकदेशमनुगृह्णातु महाभागः।**]

शकुन्तला—(किञ्चिदपसरति।)

राजा—(उपविश्य) कच्चित् सखीं वो नातिबाधते शरीरतापः ?

यस्तानि, आशु=सद्य एव, विमर्द्दितानि=घृष्टानि, मृणालवलयानि=बिसनिर्मितकटकानि, येषु तानि विमर्द्दितमृणालवलयानि, अत एव गुरुः=बलवान्, परितापः=सर्वतोभावेन सन्तापः, येषु तानि, ते=तव, गात्राणि=अङ्गानि, उपचारं=सत्कारं, नार्हन्ति। अत्र उपचारानर्हत्वं प्रति गुरुपरितापस्य हेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गालङ्कारः, परिकरालङ्कार इति केचित्। आर्य्या जातिः ॥ २१ ॥

भावार्थः—सन्दष्टकुसुमशयनानि सद्य एव विमर्द्दितानि मृणालवलयानि अत एव प्रबलसन्तापयुक्तानि तव अङ्गानि उपचारं—सत्काराय अभ्युत्थानादिकं नार्हन्ति ॥ २१ ॥

शकुन्तला—(ससाध्वसम्=ससम्भ्रमम्, आत्मगतम्=मनसि) हृदय! तथा=तेन प्रकारेण, उत्तम्य=उत्कण्ठितं भूत्वा, इदानीं=सम्प्रति मनोरथप्राप्तिसमये, न किमपि प्रतिपद्यसे=न स्वकर्त्तव्यं निश्चिनोषि।

अनसूया—इतः=अस्मिन् प्रान्ते, शिलातलस्य=प्रस्तरपट्टोपरिभागस्य, एकदेशम्=एकभागम्, अनुगृह्णातु=उपवेशनद्वारा सनाथीकरोतु, महाभागः=सौभाग्यशाली भवान्।

शकुन्तला—(किञ्चिद्=स्वल्पम्, अपसरति=राज्ञे स्थानप्रदानाय अपसरति।)

राजा—(उपविश्य=निर्दिष्टं स्थानं स्वीकृत्य) शरीरतापः=गात्रसन्तापः, वः=युष्माकम्, सखीम्=शकुन्तलाम्, नातिबाधते=नात्यन्तं पीडयति कच्चित्=किम् ?

विमर्दित हो गया है एवं जिन्हें अतिशय सन्ताप सन्तापित कर रहा है ऐसे आपके अंग सत्कारादि लोकाचार (सम्मानप्रदर्शन) करने के लिए उपयुक्त नहीं हैं ॥ २१ ॥

शकुन्तला—(**लज्जापूर्वक मन में**) हृदय! इस प्रकार उत्कण्ठित होकर अब (मनोरथ-प्राप्ति के समय) क्या करना चाहिए, इस पर विचार क्यों नहीं करते ?

अनसूया—महाभाग! इसी शिलातल पर आप भी एक ओर विराजिए।

शकुन्तला—(**कुछ खिसक जाती है।**)

राजा—(**बैठकर**) अब तो शरीर ताप आपकी सखी को विशेष कष्ट नहीं दे रहा है ?

---

whose suffering is great, do not deserve (to observe) any customary ceremony. (21)

Śakuntalā—*(Bashfully, to herself)* O heart, thus being anxious, now, why not you think, what is to be done here after.

Anasūyā—O fortunate one! Please occupy one portion of this stone slab.

Śakuntalā—*(Moves a little)*

King—*(Sitting)* Does the heat of body not give much pain to your friend now?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियंवदा—(सस्मितम्) दाणिं लद्धोषधो उवसमं गमिस्सदि। **[इदानीं लब्धौषध उपशमं गमिष्यति।]**

शकुन्तला—(सलज्जा तिष्ठति।)

प्रियंवदा—महाभाअ! दोण्णंपि वो अण्णोण्णाणुराओ पच्चक्खो; सहीसिणेहो उण मं पुणरुत्तवादिर्णी करेदि। **[महाभाग! द्वयोरपि युवयोः अन्योन्यानुरागः प्रत्यक्षः; सखीस्नेहः पुनर्मा पुनरुक्तवादिनीं करोति।]**

राजा—भद्रे! नैतत् परिहार्य्यम्। विवक्षितं ह्यनुक्तमनुतापं जनयति।

प्रियंवदा—तेण हि सुणादु अज्जो। **[तेन हि शृणोतु आर्य्यः।]**

प्रियंवदा—(सस्मितम्=सेषद्धासम्) इदानीं=सम्प्रति (त्वत्समागमे सतीत्यर्थः), लब्धम् औषधं यस्य येन वा सः लब्धौषधः=प्राप्तभेषजः, उपशमं=शान्तिं, गमिष्यति=प्राप्स्यति।

शकुन्तला—(सलज्जा तिष्ठति=सलज्जभावेन तिष्ठति।)

प्रियंवदा—महाभाग=सुभाग्यवान्! द्वयोरपि युवयोः= न त्वेकतरस्येत्यर्थः, अन्योन्यानुरागः=पारस्परिकं प्रेमः, प्रत्यक्षः=स्पष्टमनुभूतः, पुनः=तथात्वेऽपि, सखीस्नेहः=शकुन्तलोपर्य्यस्माकं नैसर्गिकः प्रणयः, पुनरुक्तं यथा स्यात्तथा वदितुं शीलं यस्यास्तां पुनरुक्तवादिनीम्=पिष्टपेषणकर्तुं शीलम् अधिकवादिनीं वा, करोति=विदधाति। (पुनरुक्तिर्यथाऽनुपादेया तद्वत् स्वतः प्रस्फुटित-स्यार्थस्य कथनद्वारा प्रकाशो नितरामनुपादेय एवेति भावः।)

राजा—भद्रे=साधुशीले! एतत्=त्वया विवक्षितं वाक्यं, न परिहार्य्यम्=न त्यक्तव्यम् (त्यक्तुं योग्यम्), हि=यतः, विवक्षितं=वक्तुमिष्टं कथनम्, अनुक्तम्=अकथितं सत्, अनुतापम्= मनस्तापम्, जनयति=उत्पादयति।

प्रियंवदा—तेन हि=तस्माद् हेतोरेव, आर्यः=भवान्, शृणोतु=आकर्णयतु।

प्रियंवदा—(**मुस्कराकर**) अब औषधि पाकर शान्त हो जायेगा।

शकुन्तला—(**लज्जापूर्वक बैठी रहती है।**)

प्रियंवदा—महाभाग! यद्यपि आप दोनों का अनुराग प्रत्यक्ष है तथापि अपनी सखी का स्नेह मुझे फिर वही बात दुहराने के लिए विवश करता है।

राजा—भद्रे! आप अपना कथन न रोकें (जो कहना हो कहें), क्योंकि यदि कोई बात कहने की इच्छा की जाय परन्तु कही न जाय तो उससे (श्रोता) को दुःख होता है।

प्रियंवदा—तो सुनिये श्रीमन्!

Priyaṁvadā—*(With smile)* That will decrease after getting medicine (in your shape).

Śakuntalā—*(Remains bashful)*

Priyaṁvadā—Your mutual affection is obvious to both of you. But love for my friend compels me to speak something superfluous or repeat it again.

King—Gentle lady! this (speech) should not be suppressed. For what is wished to be said causes remorse if unsaid.

Priyaṁvadā—Then hear me please, sir.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अवहितोऽस्मि।

प्रियंवदा—अस्समवासिणो जणस्स रण्णा अत्तिहरेण होदव्वं त्ति णं एसो धम्मो। **[आश्रमवासिनो जनस्य राज्ञा आर्त्तिहरेण भवितव्यम् इति, नन्वेष धर्म्मः ।]**

राजा—अस्मत्परं किन्तत् ?

प्रियंवदा—तेण हि इअं णो पिअसही तुमं ज्जेव उद्दिसिअ भअवदा मअणेण इमं अवत्थंतरं पाविदा, ता अरिहसि अब्भुववत्तीए जीविदं से अवलंबइदुं। **[तेन हि इयं नः प्रियसखी त्वामेव उद्दिश्य भगवता मदनेन इदमवस्थान्तरं प्रापिता, तदर्हसि अभ्युपपत्त्या जीवितमस्या अवलम्बयितुम्।]**

राजा—भद्रे! साधारणोऽयं प्रणयः। सर्वथाऽनुगृहीतोऽस्मि।

राजा—अवहितः=श्रवणाय कृतमनोऽभिनिवेशः, अस्मि=भवामि।

प्रियंवदा—आश्रमवासिनः=तपोवननिवासिनः, जनस्य, आर्तिहरणे=पीडाहरणे, राज्ञा=शासकेन, भवितव्यम्, इति, एष धर्मः=राजनीतिः, नन्वित्यवधारणे।

राजा—तत्=राज्ञ आश्रमवासिन आर्तिहरणौचित्यम्, अस्मत्परं=मद्गोचरं, किं=किमस्ति ?

प्रियंवदा—तेन हि=राज्ञ आर्तिहरणौचित्येनैव हेतुना (अर्हसीति क्रियया सहान्वयः), नः=अस्माकम्, इयं-पुरोवर्त्तिनी, प्रियसखी=शकुन्तला, त्वामेवोद्दिश्य='तं हि राजानं पतित्वेन लभेय' इति सखीमनोरथमभिसन्धाय, इदं=वर्त्तमानम्, अवस्थान्तरम्=दशाविशेषम्, भगवता=लोकातिशयितप्रभावेन, मदनेन-कामदेवेन, प्रापिता=आरोपिता। अभ्युपपत्त्या=अनुग्रहेण, अस्याः=प्रियसख्याः, जीवितम्=जीवनम्, अवलम्बयितुं=धारयितुं, अर्हसि=अधिकारी भवसि। राज्ञ आर्तिहरणौचित्येनैव हेतुना अस्याःपि कामबाधानिवारणं भवदीयं कर्तव्यमिति भावः।

राजा—मैं (सुनने के लिए) सावधान हूँ।

प्रियंवदा—राजा का धर्म है कि वह आश्रमवासियों की पीड़ा दूर करे।

राजा—इससे बढ़कर और क्या ?

प्रियंवदा—यह हमारी प्रिय सखी आपके ही कारण कामदेव द्वारा इस अवस्था को पहुँचाई गई है, अतः कृपाकर आप इसके जीवन की रक्षा करें।

राजा—यह प्रार्थना तो दोनों ओर से एक ही प्रकार की है। मैं सर्वथा आपका अनुगृहीत हूँ।

King—I am ready to hear.

Priyaṁvadā—That the king should become the remover of the suffering of the distressed, specially of the habitants of the hermitage. This is his duty.

King—Nothing higher than this.

Priyaṁvadā—Well, then, this dear friend of ours has been kept into this pitiable condition by the mighty God of love, due to you. Therefore, it is your duty to sustain her life by showing favour.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(अनसूयामवलोक्य) हला! अलं वो अंतेउरविरहवज्जुस्सुएण राएसिणा उवरुद्धेण। [हला! अलं वाम् अन्तःपुरविरहपर्य्युत्सुकेन राजर्षिणा उपरुद्धेन।]

राजा— **इदमनन्यपरायणमन्यथा हृदयसन्निहिते! हृदयं मम।**
यदि समर्थयसे मदिरेक्षणे! मदनबाणहतोऽपि हतः पुनः॥ २२॥

राजा—भद्रे! अयं=जीवितावलम्बनरूपः, प्रणयः=प्रार्थना, साधारणः=उभयोरप्यावयोः समानः। सर्वथा=सर्वप्रकारेण, अनुगृहीतोऽस्मि=अनुकम्पितो भवामि। (यथा भवतीभिरेतदर्थ-महमभ्यर्थ्ये तथा मयाऽपि एतदनुग्रहार्थं भवत्यौ प्रार्थनीये। सम्प्रति शकुन्तलासङ्गमसम्भवेन जीवनावलम्बनसम्भवात् भवत्कृपया अनुगृहीतोऽस्मीति मन्ये।)

शकुन्तला—(अनसूयां=स्वसखीम्, अवलोक्य=दृष्ट्वा) हला! वां=युवयोः, अन्तः-पुराणाम्=अन्तःपुरवासिनीनां रमणीनां, विरहेण पर्य्युत्सुकेन=उत्कण्ठितेन, राजर्षिणा=दुष्यन्तेनेति, उपरुद्धेन=मत्समागमायानुरुद्धेन, अलम् (मत्समागमनाय युवाभ्यां राज्ञोऽनुरोधो न करणीय इत्यर्थः)।

राजा—दुष्यन्तः भाविप्रणयभङ्गशङ्कामपनेतुं कथयति—

अन्वयः—हृदयसन्निहिते! अनन्यपरायणम् इदं मम हृदयम् अन्यथा यदि समर्थयसे तदा मदिरेक्षणे! मदनबाणहतोऽपि पुनः हतः अस्मि॥ २२॥

इदमिति। हे हृदयसन्निहिते=चेतोऽवस्थिते! अन्यस्यां परायणमन्यपरायणं तत्रभवतीत्य-नन्यपरायणम्=अनन्यरमण्याश्रयम्, इदं=त्वय्यनुरक्तम्, मम=दुष्यन्तस्य, हृदयं=चेतः, अन्यथा= अन्यरमणीनिष्ठम्, यदि समर्थयसे=यदि कल्पयसि, तदा मदिरे इव ईक्षणे यस्यास्तत्सम्बोधने हे मदिरेक्षणे=मदमत्तनेत्रे! मदनस्य=कामस्य, बाणैर्हतः=विद्धः, अपि पुनरत्यन्तं हतः=विद्धः, अस्मि (अहमिति शेषः)। अत्र काव्यलिङ्गं लाटानुप्रासश्चालङ्कारौ। द्रुतविलम्बितं वृत्तम्॥ २२॥

भावार्थः—सम्प्रति मम हृदयं सर्वविषयजातं परित्यज्य त्वय्येव वर्तते, तत्रापि चेत्त्वमन्य-

---

शकुन्तला—**(अनसूया को देखकर)** सखी! अन्तःपुर के वियोग से उत्कण्ठित राजर्षि से इस प्रकार अनुरोध करना अथवा उन्हें रोकना ठीक नहीं है।

राजा—हे हृदयस्था प्रियतमे! यदि एकमात्र तुम्हारे में लगे हुए इस मेरे मन को तुम किसी दूरे रूप में निरूपित करोगी तो हे मदिर नेत्रों वाली! कामबाण से मारा हुआ मैं और भी अधिक मारा जाऊँगा॥ २२॥

King—Good lady! This request is common (to both of us). I am favoured in every way.

Śakuntalā—*(Looking at Anasūyā)* Dear! what is the use of pressing the royal sage, who is anxious owing to separation from his herm?

King—If you, O gentle lady, who is living in my heart, deem this heart, which is devoted to none else, as otherwise, then O maiden of bewitching eyes, struck by Kāma's (God of love) arrows, I am struck again. (22)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनसूया—बहुवल्लहा क्खु राआणो सुणीअंति। ता जधा इअं णो पिअसही बंधुअणसोअणीआ ण होदि, तधा करिस्सदि।[**बहुवल्लभाः खलु राजानः श्रूयन्ते। तद् यथा इयं नः प्रियसखी बन्धुजनशोचनीया न भवति तथा करिष्यति।]**

राजा—भद्रे! किं बहुना?

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः।
समुद्ररसना चोर्व्वी सखी च युवयोरियम्॥ २३॥

थात्वमाशङ्कसे तर्हि अहं मदनबाणहतोऽपि पुनरत्यन्तं विद्धः इति मन्ये। मर्मच्छेदिनी ते आशङ्का सर्वथाऽऽसह्या एवेति भावः॥ २२॥

अनसूया—बह्वी वल्लभाः=प्रियाः, येषां ते बहुवल्लभाः, राजानः=भूपालाः, श्रूयन्ते= श्रवणपथमागताः (सन्तीति शेषः), तत्=तस्मात्, यथा=येन प्रकारेण, नः=अस्माकम्, प्रियसखी= शकुन्तला, बन्धुजनानाम्=अस्मदादीनाम्, शोचनीया=शोकविषया, न भवति तथा करिष्यति भवानिति शेषः। (भवतो बहुवल्लभत्वादस्यां कालेनानादरः शङ्कास्पदं स यथा न भवति तथाऽस्माकं प्रियसख्यामुपतिष्ठेति प्रार्थना।)

राजा—भद्रे=साधुशीले! किं बहुना=किं प्रचुरेण व्याहृतेन—

अन्वयः—परिग्रहबहुत्वेऽपि नः कुलस्य द्वे प्रतिष्ठे; समुद्ररसना उर्वी च, इयं युवयोः सखी च॥ २३॥

परिग्रहेति। परिगृह्यन्त इति परिग्रहाः=पत्न्यः, तासां बहुत्वेऽपि=प्राचुर्येऽपि (अनल्पत्वेऽपि), नः=अस्माकम्, कुलस्य=वंशस्य, द्वे=इमौ द्वौ (परिग्रहौ), प्रतिष्ठे= सगौरवस्थितिहेतू, समुद्रः=सागर एव, रसना=मेखला, यस्याः सा समुद्ररसना, उर्व्वी=पृथिवी च, इयं= परिदृश्यमाना, युवयोः सखी=शकुन्तला च। अत्र तुल्ययोगिता दीपकश्चालङ्कारौ। पथ्यावक्त्रं वृत्तम्॥ २३॥

भावार्थः—परिग्रहबहुत्वेऽपि उर्व्वीपतित्वेन यथाऽहं गौरवान्वितो भवामि तथा युवयोः सख्याः पतित्वेनापि आत्मानं गौरवान्वितं समर्थय इति। रघुवंशेऽपि—

अनसूया—सुनते हैं कि राजाओं की अनेक प्रेयसी होती हैं, इस स्थिति में जिस प्रकार हमारी प्रिय सखी बन्धुजनों के शोक का कारण न बने, ऐसा उपाय कीजिए।

राजा—भद्रे! अधिक कहने से क्या लाभ—

बहुत-सी स्त्रियों के रहते हुए भी मेरे वंश में गौरव के मात्र दो ही स्थल हैं। एक समुद्र की मेखलायुक्त पृथ्वी तथा दूसरी आपकी यह प्रिय सखी॥ २३॥

Anasūyā—It is heard that kings have many beloveds. So, please act in such a way that our dear friend will not have to be pitied by her kinsmen.

King—Good lady! why say much?

Though (I am) possessed of many wives, two are the main stay remaining in two places of my family the earth—girdled (enclosed) with seas and this friend of yours. (23)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उभे—णिव्वुदम्ह। [निर्वृते स्वः।]

शकुन्तला—(हर्षं सूचयति।)

प्रियंवदा—(जनान्तिकम्) अणसूए! पेक्ख पेक्ख मेहवादाहदं विअ गिह्मे मोरीं क्खणे क्खणे पच्चाअदजीविदं पिअसहीं। [**अनसूये! प्रेक्षस्व प्रेक्षस्व मेघवाताहतामिव ग्रीष्मे मयूरीं क्षणे क्षणे प्रत्यागतजीवितां प्रियसखीम्।**]

शकुन्तला—हला! मरिसावेध लोअपालं, जं अम्हेहिं विस्सद्धप्पलाविणीहिं उवआरादिक्कमेण भणिदं। [**हला! मर्षयतं लोकपालम्, यदस्माभिर्विस्रब्धप्रलापिनीभिः उपचारातिक्रमेण भणितम्।**]

'कलत्रवन्तमात्मानमवरोधे महत्यपि।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः॥' (१/३५)

तथैव अत्रापि—मम परिग्रहबहुत्वेऽपि युष्मदीया सख्येव सर्वासु पत्नीषु सर्वथा विशिष्टादरपात्रं प्रेमास्पदं च भविष्यतीत्यत्र न संशयलेशोऽपि हृदा कर्तव्य इति भावः॥ २३॥

उभे—अनसूया प्रियंवदा चेति राज्ञो वचनमाकर्ण्य सानन्दमाहतुः—निर्वृत्ते=सुखिते, स्वः=भवावः, आवामिति शेषः।

शकुन्तला—(हर्षं=प्रसन्नतां, सूचयति=अभिनयति।)

प्रियंवदा—(जनान्तिकम्=सख्याः कर्णे) अनसूये! ग्रीष्मे=ग्रीष्मर्तौ, मेघवातेन=मेघागमनकालीनानिलेन, आहतां=संस्पृष्टाम्, मयूरीमिव=मयूरपत्नीमिव, क्षणे-क्षणे=क्रमशः, प्रत्यागतजीवितां=पुनरागतप्राणाम्, प्रियसखीम्=शकुन्तलाम्, प्रेक्षस्व-प्रेक्षस्व=पश्य-पश्य। (यथा मयूरी ग्रीष्मोष्मणा गतप्राणप्राया सती सुखदमेघवायुना प्रत्यागतप्राणा भवति तथेयमावयोः प्रियसखी कामज्वरदाहेन सन्तप्ता सती सम्प्रति प्रियतमस्य राज्ञ आश्वासेन तत्समागमसुखाशया प्रत्यागतजीविताम् इव दृश्यते इति भावः।)

शकुन्तला—हला=सखि! लोकपालं=राजानं, मर्षयतं=क्षमयतम्, आत्मनोऽपराधमोचनं कारयताम्। यत्=यतः, विस्रब्धप्रलापिनीभिः=निःशङ्कं यथा स्यात्तथाऽयथार्थवादिनीभिः

दोनों—तो अब हम निवृत्त (निश्चिन्त) या सुखी हुई।

शकुन्तला—(**प्रसन्नता प्रगट करती है**)

प्रियंवदा—(**कान में**) अनसूया! देखो-देखो ग्रीष्म काल में बदली की हवा लगने से प्रसन्न मयूरी की भाँति क्षण-क्षण में हमारी प्रिय सखी भी पुनर्जीवित-सी होती दिखायी पड़ रही है।

शकुन्तला—सखी! हमें राजर्षि से क्षमा माँगनी चाहिए, क्योंकि हमलोगों ने यथेच्छ बकवास करके शिष्टाचार का उल्लंघन करते हुए बहुत-सी बातें कह डाली हैं।

Both—We are assured now.

Śakuntalā—*(Shows happiness)*

Priyaṁvadā—*(Aside)* Anasūyā! see, see our friend who is getting new life like a peahen who becomes happy with the touches of cloudy wind in summer season.

Śakuntalā—Dear! we must ask for excuse from the king, for

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सख्यौ—(सस्मितम्) जेण तं मंतिदं सो ज्जेव मरिसावेदु, अण्णस्स को अच्चओ।

[येन तन्मन्त्रितं स एव मर्षयतु अन्यस्य कः अत्ययः।]

शकुन्तला—अरिहदि क्खु महाराओ इमं विसोढुम्। परोक्खं वा ण किं को मंतेदि।

[अर्हति खलु महाराज इमं विषोढुम्। परोक्षं वा न किं को मन्त्रयति।]

राजा—(सस्मितम्)

अपराधमिमं ततः सहिष्ये यदि रम्भोरु! तवाङ्गसङ्गमृष्टे।
कुसुमास्तरणे क्लमापहेऽत्र स्वजनत्वादनुमन्यसेऽवकाशम्॥ २४॥

(अस्माभिः), उपचारातिक्रमेण=यथोचितकर्त्तव्यमर्यादोल्लङ्घनेन, भणितम्=कथितम्, प्रलपितम्। यदस्मै बहुश उपालम्भो दत्तः तस्याऽस्माभिर्मार्जना कारयितव्या।

सख्यौ—(सस्मितम्=सेषद्हासम्) येन=जनेन, तन्मन्त्रितम्=उपचारमतिक्रम्य, भणितम्=कथितम्, स एव=जनः, मर्षयतु=तज्जन्यापराधं क्षमयतु, अन्यस्य=जनस्य, कः अत्ययः=दोषः (त्वयैवापराधः कृतः त्वमेव क्षमायाचनामपि कुरु इति भावः)।

शकुन्तला—इमम्=उपचारातिक्रमणजनितापराधम्, विसोढुम्=प्रमार्ष्टुम्, अर्हति, महाराजः=भवान्, खल्वित्यनुनये। परोक्षम्=अप्रत्यक्षम् (अक्ष्णां परमिति परोक्षम्), कः=जनः, किं न मन्त्रयति=व्याहरति।

राजा—(सस्मितम्=सेषद्धासम्)

अन्वयः—रम्भोरु! यदि तवाङ्गसङ्गमृष्टे (अत एव) क्लमापहे अत्र (पुरःस्थिते) कुसुमास्तरणे स्वजनत्वात् अवकाशम् अनुमन्यसे ततः इमम् अपराधं सहिष्ये॥ २४॥

अपराधमिति। रम्भे=कदलीस्तम्भौ, इव ऊरू यस्याः तत्सम्बोधनं हे रम्भोरु=कदलीवत् शीत-सुखदस्पर्शयुक्ता ऊरूधारिणीत्यर्थः, यदि=चेत्, तव अङ्गानां, सङ्गेन=सम्पर्केण, मृष्टे=परिशोधिते विमर्दिते वा, अत एव, क्लमं=सन्तापम्, अपहन्तीति क्लमापहे=कामदाहनाशके, अत्र=अस्मिन् पुरःस्थिते, कुसुमास्तरणे=पुष्परचितशय्यायाम्, स्वजनत्वात्=आत्मीयत्वबुद्ध्या, अवकाशम्=मदवस्थानम्, अनुमन्यसे=अनुजानासि, ततः=तदा, इमम्=त्वयोक्तम्, उपचाराति-

---

सखियाँ—(**मुस्कराकर**) जिसने ऐसा किया हो (शिष्टाचार के विपरीत कहा-सुना हो) वही क्षमा माँगे, दूसरे का इसमें क्या दोष है?

शकुन्तला—महाराज! आप हमारे इस अपराध को क्षमा करें। पीठ पीछे भला कौन क्या नहीं कहता?

राजा—(**मुस्कराकर**) हे रम्भोरु! तुम्हारे अङ्ग-स्पर्श से पवित्र एवं कामदाह को दूर

---

we have told so many things frankly transgrassing the good manners of the society.

Friends—*(Smiling)* Who had committed that mistake, that one can ask for pardon. What is the fault of the others in this matter.

Śakuntalā—Excuse us of king! always people have something wrong to say behind a great person.

King—*(Smiling)* O charming lady, having thighes like the trunk of plantain! If you spare some place for me on this flowery

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियंवदा—(सोपहासम्) णं एत्तिकेण उण तुट्ठो भविस्सदि ? [**ननु एतावता पुनस्तुष्टो भविष्यति ?**]

शकुन्तला—(सरोषमिव) विरम विरम दुव्विणीदे! एतावदवत्थं गदाए मए कीलसि। [**विरम विरम दुर्विनीते! एतावदवस्थां गतया मया क्रीडसि।**]

अनसूया—(बहिः सदृष्टिक्षेपम्) पिअंबदे! एस तवस्सिमिअपोदओ इदो तदो दिस्सदिट्ठी नूणं मादरं पब्भट्टं अस्सेसदि; ता संजोजेमि णं। [**प्रियंवदे! एष तपस्विमृगपोतकः इतस्ततो दत्तदृष्टिः नूनं मातरं प्रभ्रष्टामन्विष्यति; तत् संयोजयामि एनम्।**]

क्रमणजनितं त्वदीयापराधम्, सहिष्ये=क्षमिष्ये। अन्यथा तु न केनाप्युपायेनेति भावः। अत्र काम-क्लमापहत्वं प्रति 'तवाङ्गसङ्गमृष्टे' इति पदार्थस्य हेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गम्। औपच्छन्दसिकं वृत्तम्॥ २४॥

भावार्थः—हे रम्भोरु! यदि तवाङ्गसम्पर्कपरिशोधिते कामदाहनाशके अस्मिन् कुसुमास्तरणे-आत्मीयमिति मत्वा किञ्चित् स्थानं प्रदास्यसि तदा त्वत्कृत-उपचारातिक्रमण-जनितमराधं सहिष्ये अन्यथा तु न केनाप्युपायेन॥ २४॥

प्रियंवदा—(सोपहासम्=सपरिहासम् व्यङ्ग्यपूर्वकं वा) नन्विति प्रश्ने, एतावता=एतावन्मात्रेण शय्यायामवकाशप्रदानेनैव, तुष्टः=सन्तुष्टः, कृतार्थः, भविष्यति=भवानिति शेषः।

शकुन्तला—(सरोषम्=सकोपम् इव, कृत्रिमं रोषं प्रदर्शयन्) दुर्विनीते=दुःशिक्षिते, विरम-विरम=स्वकीयां वाचं वशमानय, निग्रहेति भावः, एतावदवस्थाम्=ईदृक् शोचनीयां दशाम्, गतया=प्राप्तया, मया=मया सह, क्रीडसि=परिहासं करोषि। इदं तु महदनुचितम्।

अनसूया—(बहिः=बाह्यदेशे, सदृष्टिक्षेपम्=किञ्चिद् व्याजकरणाय दृष्टिक्षेपणं कृत्वा), प्रियंवदे! एषः=पुरतः स्थितः, तपस्विः=अनुकम्पार्हः, चासौ मृगपोतकः=क्षुद्रहरिणशावः, चेति

करने वाली इस पुष्पशय्या पर यदि अपना समझकर कर थोड़ा-सा स्थान दे दोगी तो मैं तुम्हारे उपचारातिक्रमणजन्य अपराध को क्षमा कर दूँगा॥ २४॥

प्रियंवदा—(उपहासपूर्वक) क्या इतने से ही सन्तुष्ट हो जायेंगे ?

शकुन्तला—(प्रकुपित की भाँति) चुप, चुप दुर्विनीते! इस दुरवस्था में पहुँची हुई मेरे साथ ऐसा मजाक कर रही है।

अनसूया—(बाहर की ओर दृष्टि डालकर) प्रियंवदा! तपस्वियों द्वारा पाला हुआ यह मृगछौना इधर-उधर दृष्टि डाल रहा है। जान पड़ता है कि यह अपनी बिछुड़ी हुई माँ को ढूँढ़ रहा है। तो चलूँ, इसे इसकी माँ से मिला दूँ।

---

bed, which is sanctified with the touch of your limbs and is remover of sufferings then only I can excuse your faults, which you committed by transgressing the social laws. (24)

Priyaṁvadā—(Jocularly) Will you be satisfied with this much only?

Śakuntalā—(Acting angry) Stop-stop O ill-mannered! you are cutting jokes with me, who has reached this pitiable condition.

Anasūyā—(Casting a glance) Priyaṁvadā, there is the eager

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियंवदा—हला ! चवलो क्खु एसो, ण एणं संजोजइदुं एआइणी पारेसि, ता अहंपि सहाअत्तणं करिस्सं। (इत्युभे प्रस्थिते) **[हला! चपलः खल्वेषः, न एनं संयोजयितुमेकाकिनी पारयसि, तदहमपि सहायत्वं करिष्यामि।]**

शकुन्तला—हला! इदो अस्मदो ण वा गन्तुं अणुमस्से, जदो असहाइणी म्हि। **[हला! इतः अन्यतो न वां गन्तुमनुमन्ये, यतोऽसहायिन्यस्मि।]**

उभे—(सस्मितम्) तुमं दाव असहाइणी, जाए पहवीणाहो समीवे वट्टदि। **[त्वं तावदसहायिनी यस्याः पृथिवीनाथः समीपे वर्त्तते।** (इति निष्क्रान्ते।)

तपस्विमृगपोतकः, इतस्ततः=सर्वासु दिक्षु, दत्तदृष्टिः=अवलोकनपरायणः, नूनम्=निश्चितम्, प्रभ्रष्टाम्=असावधानतया एनं परित्यज्य दिगन्तरप्राप्ताम्, मातरं=जननीम्, अन्विष्यति=अनुसन्धानं करोति। तत्=तस्मात्, संयोजयामि=मात्रा सह मेलयामि, एनम्=मृगशावम्।

प्रियंवदा—हला=सखि! एषः=मृगशावः, चपलः=चञ्चलः, खलु=इति निश्चयेन, अत एव, एनं=मृगपोतकम्, संयोजयितुम्=मात्रा सह मेलयितुम्, एकाकिनी=अनन्यसहाया सति, न पारयसि=न शक्नोषि, तत्=तस्मात्, अहमपि, सहायत्वं=तव साहाय्यम्, करिष्यामि। (इति=एवं, उभे=सखीद्वयम्, प्रस्थिते=मञ्चाद् प्रस्थिते)।

शकुन्तला—हला=सखि! इतः=अस्मात् स्थानात्, अन्यतः=अन्यत् स्थानम् (अन्यत्र), वां=युवाम्, गन्तुम्=यातुं, न अनुमन्ये=न अनुजानामि। यतः, सहायोऽस्या अस्तीति सहायिनी, न सहायिनी असहायिनी=एकाकिनी, अस्मि=भवामि! एकाकिनीं मां विहाय इदानीं युवयोर्गमन-मसङ्गतमिति भावः।

उभे—(सस्मितम्=सेषद्धासम्) त्वं तावद्, असहायिनी=एकाकिनी, यस्याः=तव, समीपे=पार्श्वे, पृथिवीनाथः=पृथिवीपालः, वर्त्तते=विद्यते। राजा दुष्यन्तसहायत्वेऽपि त्वं कथम् एकाकिनी इति कथयसि? (इत्युक्त्वा निष्क्रान्ते=सख्यौ रङ्गात् प्रस्थितेति भावः।)

प्रियंवदा—सखी! यह बड़ी चञ्चल है। तुम अकेली इसे इसकी माँ से न मिला सकोगी। (अतः चलो) मैं भी (इस कार्य में) तुम्हारी सहायता करूँगी। **(ऐसा कहकर दोनों का प्रस्थान।)**

शकुन्तला—सखी! मैं तुम्हें यहाँ से जाने की आज्ञा नहीं दूँगी, क्योंकि मैं अकेली हूँ।

दोनों—**(मुस्कराकर)** जिसके पास स्वयं पृथिवीपति बैठे हों वह भला अकेली कैसे? **(दोनों प्रस्थान करती हैं।)**

---

young antelope turning his eyes here and there and searching his mother, let me help him to join his mother.

***Priyaṁvadā*—**Dear! it is very naughty. You alone can not join it with its mother. Let me join you, to help you to join it with its mother.

***Śakuntalā*—**Friends! I won't permit you to leave this place or go from here, as I am alone.

Both*—*(Smiling) Where is the lord of earth himself, how can she be alone?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—कधं गदाओ ज्जेब पिअसहीओ। [कथं गते एव प्रियसख्यौ।]

राजा—सुन्दरि! अलमावेगेन; नन्वयमाराधयिता जनस्ते सखीभूमौ वर्त्तते। तदुच्यताम्—

किं शीकरैः क्लमविमर्द्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम्।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु! यथासुखं ते॥ २५॥

शकुन्तला—कथमिति प्रश्ने सम्भ्रमे वा, प्रियसख्यौ, गते एव=न तु व्याजेन तिरोभूय स्थिते।

राजा—सुन्दरि! आवेगेन=सखीजनासान्निध्यहेतुकेन सम्भ्रमेण, अलं=पर्याप्तम् (मास्त्वित्यर्थः), ननु=इति अनुनये, अयम्=पुरतःस्थितः, आराधयिता=प्रीणयिता, जनः=पुरुषः दुष्यन्तः, सखीभूमौ=सखीपदे, वर्त्तते=तिष्ठति (अहमेव ते सखीवत् शुश्रूषां करणार्थं प्रस्तुतोऽस्मि अत आवेगं मा कुरु)। तद्=तस्मात्, उच्यताम्=कथय—

अन्वयः—करभोरु! क्लमविमर्द्दिभिः शीकरैः आर्द्रवातं नलिनीदलतालवृन्तं सञ्चालयामि किम् उत पद्मताम्रौ ते चरणौ अङ्के निधाय यथासुखं संवाहयामि॥ २५॥

किं शीकरैरिति। हे करभोरु!—करभाविव=मणिबन्धात् कनिष्ठिकाङ्गुलिपर्य्यन्तप्रदेशाविव, ऊरू यस्यास्तत्सम्बोधने हे करभोरु! क्लमं=शरीरतापं, विशेषेण मर्द्दयितुं=नाशयितुं, शीलं येषां ते तैः क्लमविमर्द्दिभिः=तापनिवारकैः, शीकरैः=जलकणैः, आर्द्रः=क्लिन्नः, आर्द्रवत् शीतलः, वातः=वायुः, यस्य तत् आर्द्रवातम्, नलिन्याः=पद्मलतायाः, दलं=पत्रमेव, तालवृन्तम्=व्यजनम्, नलिनीदलतालवृन्तम्, सञ्चालयामि=आन्दोलयामि, किमिति प्रश्ने। उत=अथवा, पद्मे=कुशेशये, इव ताम्रौ=अरुणौ, पद्मताम्रौ=रक्तौ, ते=तव, चरणौ=पादौ, अङ्के=क्रोडे (उत्सङ्गे), निधाय=निवेश्य, यथासुखम्=येन प्रकारेण ते सुखं स्यात् तेनैव प्रकारेण, संवाहयामि=मर्द्दयामि। अत्र नलिनीदले तालवृन्तत्वारोपस्य प्रकृतवीजनोपयोगित्वात् परिणामालङ्कारः किञ्च पदार्थहेतुकं काव्यलिङ्गमपि, तथा च साभिप्रायविशेषणत्वेन परिकरोऽपि। वसन्ततिलकं वृत्तम्॥ २५॥

शकुन्तला—क्या मेरी प्रिय सखियाँ वस्तुतः चली गईं?

राजा—सुन्दरी! घबराओ नहीं, तुम्हारा यह सेवक उन सखियों के स्थान पर (सेवा करने के लिए) उपस्थित है। तो कहो—

हे रम्भोरु! थकावट को दूर करने वाले, जलबिन्दुओं से भीगे हुए कमलिनी के पत्तों से पंखा झलूँ या कमल जैसे लाल-लाल तुम्हारे पाँवों को अपनी गोद में रखकर तुम्हें सुखी करने के लिए उन्हें धीरे-धीरे दबाऊँ?॥ २५॥

Śakuntalā—Why, have my friends gone realy?

King—O beautiful one! do not be anxious. Is not this person, your adorer, near you?

Shall I set in motion the moist breezes by means of fans of cool lotus-leaves to dissipate your languor fatigue, or shall I, O round-thighed maiden, lay those feet red as lotuses in my lap and press them so as to relieve your fatigue? (25)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—ण माणणीएसु जणेसु अत्ताणं अवराहइस्सं। (इत्यवस्थासदृशमुत्थाय प्रस्थातुमिच्छति।) **[न माननीयेषु जनेषु आत्मानमपराधयिष्यामि।]**

राजा—(अवष्टभ्य) सुन्दरि! अपरिनिर्वाणो दिवसः, इयञ्च ते शरीरावस्था।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणा।
कथमातपे गमिष्यसि परिबाधाकोमलैरङ्गैः ॥ २६ ॥

(इति बलान्निवारयति।)

भावार्थः—ममैवात्र ते शुश्रूषाकरणे विद्यमानत्वात् सख्योः प्रस्थानेऽपि न ते परिचर्यायां कापि त्रुटिर्भविष्यतीति निदर्शयन् पृच्छति राजा यत्—हे करभोरु! शरीरतापनाशकैः जलकणैः आर्द्रवातं नलिनीदलव्यजनं तवोपरि आन्दोलयामि किम् उत पद्मवत् कमनीयारुणौ तव चरणौ मदीय उत्सङ्गे निधाय मन्दं-मन्दं संवाहयामि किम्? ॥ २५ ॥

शकुन्तला—माननीयेषु=पूज्येषु, जनेषु, आत्मानं, न अपराधयिष्यामि=नापराधिनं करिष्यामि। अयं पादसंवाहनादिरूपोपचारो मास्त्वित्यर्थः। (इति=एवम्, अवस्थासदृशं=निज-दौर्बल्यानुरूपम्, उत्थाय, प्रस्थातुं=गन्तुमिच्छति न तु प्रस्थिता इत्यर्थः।)

राजा—(अवष्टभ्य=शकुन्तलां अभिरुध्य) सुन्दरि! दिवसः=वासरः, अपरिनिर्वाणः= अवसानं न गतः (इदानीमपि प्रखरतापोऽस्ति), इयञ्च=ईदृशी च, ते=तव, शरीरावस्था=दैहिकदशा, अत एव ईदृग् रुग्णप्रायशारीरिकदशायां गमनमनुचितमेवेति भावः।

अन्वयः—नलिनीदलकल्पितस्तनावरणा त्वं कुसुमशयनम् उत्सृज्य परिबाधाकोमलैः अङ्गैः आतपे कथं गमिष्यसि? ॥ २६ ॥

उत्सृज्येति। नलिनीदलेन=पद्मिनीपत्रेण, कल्पितं=रचितं, स्तनयोरावरणं=तापप्रशमना-याच्छादनं, यस्याः सा नलिनीदलकल्पितस्तनावरणा, त्वम्, कुसुमशयनम्=पुष्पमयीं शय्याम्, उत्सृज्य=त्यक्त्वा, परिबाधया=परितः सन्तापेन, कोमलैः=मार्द्दवं गतैः (दुर्बलैः), अथवा परितः

शकुन्तला—मैं आप जैसे माननीय व्यक्ति के निकट अपने आपको अपराधिनी नहीं बनाऊँगी। **(यह कहकर अपनी अवस्थानुसार धीरे से उठकर जाना चाहती है।)**

राजा—**(शकुन्तला को रोककर)** अभी दिन नहीं बीता है और तुम्हारे शरीर की यह दशा है—

तुम्हारे दोनों स्तन कमल के पत्तों से ढँके हुए हैं, इस स्थिति में तुम फूलों के बिस्तर को छोड़कर इस पीड़ा से दुबर्ल शरीर से धूप में किस प्रकार जाओगी? ॥ २६ ॥

(यह कहकर बलपूवक जाने से रोकता है।)

Śakuntalā—I will not offend against those whom I am bound to pay respect. *(Saying thus gets up and desires to leave)*

King—*(Stop her)* O beautiful one! the day is not yet cool, and such is your condition.

Leaving the bed of flowers where lotus leaves formed the covering of your bosom, how will you go in the sun, with your limbs slandered so languid by suffering. (26)

(Saying this, he forcibly draws her back)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—मुंच मुंच मं, ण क्खु अत्तणो पहवामि; अथवा सहीमेत्तसरणा किं दाणिं एत्थ करिस्सं। **[मुञ्च मुञ्च माम्, न खलु आत्मनः प्रभवामि; अथवा सखीमात्रशरणा किमिदानीमत्र करिष्यामि ?]**

राजा—धिग् व्रीडितोऽस्मि।

शकुन्तला—ण क्खु अहं महाराअं भणामि, देव्वं उवालहामि। **[न खलु अहं महाराजं भणामि; दैवमुपालभे।]**

राजा—अनुकूलकारि दैवं कथमुपालभ्यते ?

शकुन्तला—कधं दाणिं ण उवालहिस्सं, जं मं अत्तणो अणीसं कदुअ परगुणेहिं लोहावेदि। **[कथमिदानीं न उपालप्स्ये, यन्मामात्मनः अनीशां कृत्वा परगुणैर्लोभयति।]**

बाधाः यस्याः सा-परिबाधा इति शकुन्तलाविशेषणम्, अङ्गैः=अवयवैः, आतपे=घर्म्मे, कथं गमिष्यसि=यास्यसि ? अत्र काव्यलिङ्गमलङ्कारः, आर्य्या जातिः ॥ २६ ॥

भावार्थः—सुतरां स्वस्थोऽपि वस्त्रावरणादिकं त्यक्त्वाऽऽतपे गन्तुमसमर्थो भवति मानवः, त्वं तु स्वभावतः कोमलाङ्गी, तत्रापि कामदाहेन दग्धा—भृशं पीडिता अत एव ईदृगवस्थापन्ना त्वं कुसुमशयननलिनीदलादिकं त्यक्त्वा कथमन्यत्र गन्तुं शक्नोषि ? ॥ २६ ॥

(इति=एवमुक्त्वा, बलात्=बलपूर्वकम्, निवारयति शकुन्तलामितिशेष)

शकुन्तला—मुञ्च-मुञ्च=बलात्कारेण मां मा स्पृश, सम्भ्रमे द्विरुक्तिः, मां=शकुन्तलाम्, खलु इति निश्चयेन, नात्मनः प्रभवामि=प्रभुर्भवामि (स्वत एव आत्मनः प्रभुत्वाभावात् तव मनोरथपूरणाय समर्था भवामीति भावः)। अथवा=उत (यद्वा), सखीमात्रं=सख्यावेव, शरणं= नियन्तृत्वे नावलम्बनं, यस्याः सा सखीमात्रशरणा, अत्र=अस्मिन् विषये, इदानीम्=सम्प्रति, किं करिष्यामि ? गमनमन्तरेत्यर्थः। गमनमेव सङ्गतम्।

राजा—धिगिति आत्मनिन्दायाम्, व्रीडितः=लज्जितः, अस्मि=भवामि। (तथैवाहूय पश्चात् प्रत्याख्यातत्वेन विफलमनोरथत्वाल्लज्जयात्मानं भर्त्सयामि इति भावः)।

शकुन्तला—छोड़ो-छोड़ो—मैं स्वयं अपने अधीन नहीं हूँ। अथवा केवल ये सखियाँ ही मेरी सहायिका हैं। फिर मैं अकेली यहाँ रहकर क्या करूँगी ?

राजा—ओह ! मैं लज्जित हो गया।

शकुन्तला—मैं महाराज को कुछ नहीं कहती, अपने भाग्य को कोसती हूँ।

राजा—अनुकूल कार्य करने वाले भाग्य को क्यों कोसती हो ?

शकुन्तला—क्या न उपालम्भ दूँगी, वह मुझे पराधीन बनाकर दूसरे के गुणों पर लुब्ध करता (ललचाता) है।

Śakuntalā—Leave me, leave me O king! I am not under my own control (or independent) or these friends are my refuge, what will I do remaining here alone.

King—Oh, I am ashamed.

Śakuntalā—I am not telling you any thing but cursing my luck.

King—Why are you cursing your favourable luck?

Śakuntalā—Why not, I blame (the luck) when this making me dependent, attracts towards the qualities of others.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(स्वगतम्)

अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपाः
काङ्क्षन्त्योऽपि व्यतिकरसुखं कातराः स्वाङ्गदाने।
आबाध्यन्ते न खलु मदनेनैव लब्धान्तरत्वा-
दाबाधन्ते मनसिजमपि क्षिप्तकालाः कुमार्य्यः॥ २७॥

(शकुन्तला गच्छत्येव)

शकुन्तला—अहम्=शकुन्तला, महाराजं=त्वं, दुष्यन्तम्, न भणामि=न कथयामि, खल्विति निश्चयेन, (अपितु) दैवम्=अदृष्टम्, उपालभे=तिरस्करोमि।

राजा—अनुकूलं=स्वाभिमतं, करोति=प्रतिपादयतीति अनुकूलकारि=अभिमतार्थ-साधीत्यर्थः, दैवम्=अदृष्टम्, कथमुपालभ्यते=निन्द्यते त्वयेति शेषः) (आवयोः परस्परसम्मेलनद्वारा दैवस्यानुकूलकारित्वाद् तन्निन्दाऽऽनावश्यकीति भावः।)

शकुन्तला—कथम्, इदानीं=सम्प्रति (दैवम्), न उपालप्स्ये=उपालम्भो न देयमिति भावः। यत्=यस्मात्, आत्मनोऽनीशाम्=अस्वतन्त्राम्, कृत्वा=विधाय, परगुणैः=अन्यदीयशौर्यादिभिः, लोभयति=परस्मिन्ननुरागं जनयति।

राजा—(स्वगतम्=आत्मगतम्, अस्पष्टम्)

अन्वयः—महति औत्सुक्ये अपि दयितप्रार्थनासु प्रतीपाः व्यतिकरसुखं काङ्क्षन्त्योऽपि स्वाङ्गदाने कातराः; अत एव क्षिप्तकालाः कुमार्य्यः लब्धान्तरत्वात् मदनेनैव न खलु आबाध्यन्ते किन्तु मनसिजमपि आबाधन्ते॥ २७॥

अप्यौत्सुक्य इति। महति=विपुले, औत्सुक्ये=रन्तुमाग्रहे सत्यपि, दयितस्य=वल्लभस्य, प्रार्थनासु=याचनासु (रतिविषयक इत्यर्थः), प्रतीपाः=पराङ्मुख्यः, व्यतिकरसुखम्=सङ्गमसुखम्, [काङ्क्ष]न्त्योऽपि=अभिलषन्त्योऽपि, स्वाङ्गदाने=रत्यर्थं तत्साधनावयवार्पणे, कातराः=भीरुकाः (लज्जया कातराः), अत एव क्षिप्तः=अतिक्रान्तः (समुपस्थितोऽपि मौग्ध्येन रमणविनेति भावः), कालः=मदनस्य चरितार्थतासमयः,याभिस्ताः क्षिप्तकालाः, कुमार्य्यः=अविवाहिता योषितः,

---

राजा—(मन में) ये कुमारियाँ प्रिय समागम के लिए अतीव उत्कण्ठित होते हुए भी अपने प्रियतम से (उसे सामने पाकर) प्रतिकूल व्यवहार करती हैं; यद्यपि इनके मन में मिलन सुख की अभिलाषा रहती है तथापि अङ्ग-समर्पण में कातरता दिखलाती हैं—यह देखकर प्रतीत होता है कि अवसर पाकर केवल कामदेव ही उनको कष्ट नहीं देता अपितु समय बिता कर वे भी कामदेव को सताती हैं॥ २७॥

(शकुन्तला चलती ही जाती है)

King—(Himself) These madains, even being more anxious for joining with their lovers, are behaving otherwise. Though they have great desire for amorous pleasures, yet, show fear in presenting the limbs, as such it seems that the god of love not only pinning for them when ever he gets chance, but these too give him pain by wasting the proper time.

(Śakuntalā forwards)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—न कथमात्मनः प्रियं करिष्ये। (उपसृत्य पटान्तमवलम्बते।)

शकुन्तला—पौरव! रक्ख रक्ख विणअं, इदो तदो इसिओ संचरंति। [**पौरव! रक्ष रक्ष विनयम्, इतस्ततः ऋषयः सञ्चरन्ति।**]

राजा—सुन्दरि! अलं गुरुजनाद् भयेन न ते विदितधर्मा तत्रभवान् कण्वः खेदमुपयास्यति। यतः—

गान्धर्वेण विवाहेन बह्व्योऽथ मुनिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः॥ २८॥

लब्धान्तरत्वात्=प्राप्तावकाशतया, मदनेनैव=केवलं सरेणैव, न खलु आबाध्यन्ते=नैव प्रपीड्यन्ते, किन्तु मनसिजं=कामदेवमपि, आबाध्यन्ते=पीडयन्ति। अत्र अप्रस्तुतप्रशंसा सन्देहालङ्कारश्च॥ २७॥

भावार्थः—शकुन्तलाया महति प्रणयौत्सुक्ये सत्यपि, लज्जया वल्लभस्य रत्यर्थं प्रार्थनायां विषये पराङ्मुखतया तथा सुरतसुखमभिलषन्त्या अपि तत्साधनीभूतावयवार्पणे कातरता च प्रतीयते, अत एव सा शकुन्तला लब्धावकाशेन मदनेन पीडिता भूत्वापि स्वयं हि मदनं तदभिमताननुष्ठानद्वारा पीडयति इत्थं परस्परेण महान् संग्रामो जात इति भावः॥ २७॥

(शकुन्तला, गच्छत्येव=दुष्यन्तानुरोधं तिरस्कृत्य गच्छत्येव।)

राजा—आत्मनः=स्वस्य, प्रियं=सुखकरं, कथं न करिष्ये=किमर्थं नानुष्ठास्यामि। (उपसृत्य=कतिचिद् पदानि धृत्वा, पटान्तरम्=वस्त्राञ्चलम्, अवलम्बते=गृह्णाति।)

शकुन्तला—पुरोरपत्यं पुमान् तत्सम्बोधनम्—पौरव!=पुरुवंशप्रभव! विनयम्=सौजन्यं मर्यादां वा, रक्ष-रक्ष=पालय-पालय, इतस्ततः=सर्वतः, ऋषयः=तापसाः, सञ्चरन्ति=पर्यटन्ति (यदि कश्चित् ईदृशं व्यापारमवलोक्य पितुः समीपे सूचयेत् तर्हि महाननर्थो भवेदिति भावः)।

राजा—सुन्दरि=शोभनरूपसम्पन्ने! गुरुजनात्=पितुः, भयेन, अलम्=पर्याप्तम्, भयं मा कृथा इत्यर्थः, विदिताः=अवगताः, धर्माः=लोकाचाराः, येन सः विदितधर्मा, तत्रभवान्=पूज्यः, ते=त्वत्सम्बन्धे, अस्मिन् समागमविषये, खेदं=पश्चात्तापं, न उपयास्यति=न प्राप्स्यति। गान्धर्व-विवाहस्य शास्त्रसम्मतत्वात् तव चिन्ता सर्वथैव निरर्थकेति भावः। यतः—

राजा—अब क्यों न मैं अपना प्रिय कर लूँ? **(आगे बढ़कर आँचल पकड़ता है।)**

शकुन्तला—पौरव! शिष्टाचार की रक्षा कीजिए, (देखिए) इधर-उधर ऋषि आ-जा रहे हैं।

राजा—सुन्दरी! गुरुजनों से न डरो, क्योंकि लोकाचार से परिचित भगवान् कण्व

***King*—Why not I do my wished one now.** *(Forwarding and catching the corner of her garment)*

***Śakuntalā*—**O, descendent of Purū! keep yourself within the bounds of modesty. See the sages are moving here and there.

***King*—**O beautiful one! do not fear your elders. For the revered father of this hermitage, Kaṇva, who knows the law will not take exception to it (when he sees it). Moreover—

Many daughters of the sages are heard to have been married

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(दिशोऽवलोक्य) कथं प्रकाशं निर्गतोऽस्मि? (शकुन्तलां हित्वा पुनस्तैरेव पदैर्निवर्त्तते)।

शकुन्तला—(पदान्तरे प्रतिनिवृत्य साङ्गभङ्गम्) पौरव! अणिच्छापूरओ वि संभासणमेत्तपरिचिदो अअं जणो ण विसुमरिदव्वो। **[पौरव! अनिच्छापूरकोऽपि सम्भाषणमात्रपरिचितः अयं जनः न विस्मर्त्तव्यः।]**

अन्वयः—बह्व्यः मुनिकन्यकाः गान्धर्वेण विवाहेन परिणीताः। अथ पितृभिः ताः अनुमोदिताः इति श्रूयन्ते॥ २८॥

गान्धर्वेणेति। बह्व्यः=अनेकाः, मुनिकन्यकाः=तापसकुमार्य्यः, गान्धर्वेण विवाहेन= 'करस्पर्शस्तु गान्धर्वः' इति लक्षणलक्षितेनोद्वाहेन, परिणीताः=पुरुषैः समूढाः, अथ किन्तु= परिणयानन्तरमपि, पितृभिः=तद्गुरुजनादिभिः, ताः=परिणीताः कन्यकाः, अनुमोदिताः= अभिनन्दिताः, समर्थिताः, इति श्रूयन्ते=इतिहासपुराणादिपरकाख्यानेषु आकर्ण्यन्ते। अत्र अप्रस्तुत-प्रशंसाऽलङ्कारः, पथ्यावक्त्रं वृत्तम्॥ २८॥

भावार्थः—सुन्दरि! न भेतव्यम्, यतः बह्व्यः तापसकुमार्य्यः गान्धर्वेण विवाहेन परिणीताः। परिणयानन्तरमपि ताः कन्यकाः पितृभिः न भर्त्सिता अपितु अभिनन्दिता एव एवम् इतिहासपुराणादिषु श्रूयन्ते॥ २८॥

(दिशोऽवलोक्य=इतस्ततो दृष्ट्वा) कथं, प्रकाशम्=लतामण्डपाद् बहिःप्रदेशम्, निर्गतोऽस्मि =निःसृतोऽस्मि (शकुन्तलानुसरणे इति भावः), शकुन्तलां हित्वा=त्यक्त्वा, पुनस्तैरेव पदैः=यैरेव पदैः प्रकाशं गतस्तैरेवेत्यर्थः, विवर्तते=प्रत्यागच्छति लतागृहे।

शकुन्तला—(पदान्तरे=अन्यस्मिन् पदसञ्चारे तत्समये एवेत्यर्थः, प्रतिनिवृत्त्य=परिवृत्य, अङ्गभङ्गेन सहितं साङ्गभङ्गम्=अङ्गानि किञ्चिद्वक्रीकृत्य) पौरव! न इच्छायाः पूरक इति अनिच्छापूरकः अपि=अपूरिताभिलाषोऽपि, सम्भाषणमात्रेण=आलोपेनैव, परिचितः=विदितः, अयं जनः=शकुन्तलारूपः, न विस्मर्तव्यः=न मनसः परिहरणीयः।

तुम्हारे इस कार्य से अप्रसन्न न होंगे, क्योंकि सुनते हैं कि अनेकानेक ऋषिकन्याओं ने गान्धर्व विवाह किया और उनके इस कार्य का उनके गुरुजनों ने अनुमोदन ही किया॥ २८॥

(इधर-उधर देखकर) क्या मैं प्रकाश में आ गया? **(शकुन्तला को छोड़कर पुनः (लतामण्डप में) लौट जाता है।)**

शकुन्तला—(एक पैर आगे बढ़ाकर लौटती है और अङ्गभङ्गी के साथ) पौरव! अपनी इच्छा पूरी न होने पर भी सम्भाषण मात्र से परिचित इस जन को भूलियेगा नहीं।

---

by the ceremony called 'Gandharva', and even their fathers have approved of them. (28)

(Watching around) Have I come in an open place? *(Returns back, leaving Śakuntalā)*

Śakuntalā—*(Puts a step forward, then turning to the king with style)* O, descendent of Purū! though your desire is not fulfilled yet do not forget this man, who has come to your contact through conversation.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—सुन्दरि!

त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे।
दिवावसाने च्छायेव पुरो मूलं वनस्पतेः॥ २९॥

शकुन्तला—(स्तोकमन्तरं गत्वा आत्मगतम्) हद्दी हद्दी! इमं सुणिअ ण मे चलणा पुरमुहा पसरंति। भोदु, इमेहिं पज्जंतकुरुवएहिं ओवारिदसरीरा भविअ पेक्खिस्सं दाव से भावाणुबन्धं। [**हा धिक् हा धिक्! इदं श्रुत्वा न मे चरणौ पुरोमुखौ प्रसरतः। भवतु, एभिः पर्यन्तकुरबकैः अपवारितशरीरा भूत्वा प्रेक्षिष्ये तावदस्य भावानुबन्धम्** (तथा कृत्वा स्थिता)।

राजा—कथमेवं प्रिये! अनुरागैकरसं मामुत्सृज्य निरपेक्षैव गतासि।

राजा—सुन्दरि!

अन्वयः—दिवावसाने वनस्पतेः छाया पुरः दूरं गच्छन्त्यपि मूलम् इव त्वं पुरः गच्छन्त्यपि मे हृदयं न जहासि॥ २९॥

त्वमिति। दिवावसाने=सूर्यास्तमनवेलायां, वनस्पतेः=वृक्षस्य, छाया=अनातपः, पुरः=अग्रतः, दूरं गच्छन्त्यपि, मूलं=वृक्षमूलं, इव, त्वम्, पुरः=दूरं गच्छन्त्यपि, मे=मम, हृदयं=मानसं, न जहासि=न मुञ्चसि। अत्र पूर्णोपमाऽलङ्कारः॥ २९॥

भावार्थः—सूर्यास्तमनवेलायां यथा पादपच्छाया पुरः दूरं गच्छन्त्यपि वृक्षमूलं न जहाति तथैव मां परित्यज्य पुरः गच्छन्त्यपि त्वं मम हृदयं न मुञ्चसि॥ २९॥

शकुन्तला—(स्तोकमन्तरं गत्वा=किञ्चिद्दूरं गत्वा, आत्मगतम्=निजमनसि) हा धिक्! हा धिक्! इदं=राजोक्तं, श्रुत्वा=आकर्ण्य, मे=मम, चरणौ=पादौ, पुरोमुखौ=अग्रे, न प्रसरतः=न चलतः, भवतु=अस्तु, एभिः=पुरतः स्थितैः, पर्यन्तकुरबकैः=प्रान्तवर्तिभिः कुरुबकाख्यवृक्षैः, अपवारितं शरीरं यस्याः सा अपवारितशरीरा=अन्तर्हितदेहा, भूत्वा, तावत्=तावत्कालपर्यन्तम्, अस्य=राज्ञः, भावस्य=हृदयस्थविचारस्य, अपरिपुष्टानुरागस्य, अनुबन्धनम्=अनुवृत्तिम्, प्रेक्षिष्ये=पश्यामि।

राजा—हे प्रिये! अनुरागः=रतिरेव, एकः=केवलः, रसः=आस्वादः, यस्य तम् अनुरागै-

---

राजा—सुन्दरी! जैसे सन्ध्या के समय छाया वृक्ष से आगे खिसककर भी उसके मूलभाग को नहीं छोड़ती, उसी प्रकार तुम आगे जाने पर भी मेरा हृदय नहीं छोड़ रही हो।

शकुन्तला—(भीतर जाकर अपने मन में) हाय धिक्कार है, धिक्कार है, यह कथन सुनकर तो मेरे पाँव आगे ही नहीं बढ़ते। अच्छा, तो इस कुरुबक के पीछे छिपकर इसके भावों को देखती हूँ। **(उसी प्रकार खड़ी हो जाती है।)**

राजा—प्रिये! भला ऐसा क्यों? अपने प्रेम से डूबे हुए मुझे इस प्रकार निःस्पृह होकर क्यों एकाकी छोड़कर (इस प्रकार) चली गई हो?

King—O timid one! as the shadow of the tree in the evening even marching forward never leaves its root, similarly marching forward you too do not leave my heart. (29)

Śakuntalā—*(Entering inside)* Oh, very bad. Hearing this my feet do not move forth. Well, I shall see his feelings, hiding myself behind this kuruvāka.

King—How O beloved of mine! without any longing you

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनिर्दयोपभोगस्य रूपस्य मृदुनः कथम्।
कठिनं खलु ते चेतः शिरीषस्येव बन्धनम्॥ ३०॥

शकुन्तला—एदं सुणिअ ण मे अत्थि विभवो गच्छिदुं। **[इदं श्रुत्वा न मे अस्ति विभवो गन्तुम्।]**

राजा—सम्प्रति प्रियाशून्ये किमस्मिन् लतामण्डपे करोमि? (अग्रतोऽवलोक्य) हन्त! व्याहतं मे गमनम्।

करसम्, माम्=दुष्यन्तम्, एवम्=अनेन प्रकारेण एकाकीत्यर्थः, कथं=केन प्रकारेण, निरपेक्षैव= निःस्पृहैव, गतासि=प्रस्थानं करोषि? अहो तव हृदयं कठिनतरं खल्विति।

अन्वयः—अनिर्दयोपभोगस्य मृदुनः शिरीषस्य बन्धनम् इव (अनिर्दयोपभोगस्य) ते रूपस्य चेतः कथं कठिनम्॥ ३०॥

अनिर्दयोपेति। अनिर्दयम्=अतिकोमलत्वेनागाढं, यथा स्यात्तथा उपभोगः यस्य तस्य अनिर्दयोपभोगस्य, मृदुनः=सुकुमारस्य, शिरीषस्य=शिरीषपुष्पस्य, बन्धनं=वृन्तम्, इव=यथा (अनिर्दयोपभोगस्य=अजातगाढालिङ्गनचुम्बनादिव्यापारस्य), मुदुनः, ते=तव, रूपस्य=आकारस्य सम्बन्धि, चेतः=हृदयम्, कथं कठिनम्=केन प्रकारेण काठिन्ययुतम्? अत्र पूर्णोपमाऽलङ्कारः॥ ३०॥

भावार्थः—अनिर्दयोपभोगस्य सुकुमारशिरीषपुष्पस्य वृन्तमिव अनिर्दयोपभोगस्य तव सुकोमलरूपस्य हृदयं कथमीदृग् कठिनम्?॥ ३०॥

शकुन्तला—इदं=राज्ञ ईदृशं स्निग्धवचनम्, श्रुत्वा=आकर्ण्य, मे=मम, गन्तुम्=इतो यातुं, विभवः=शक्तिः, न अस्ति=न विद्यते।

राजा—सम्प्रति=इदानीम्, प्रियया=शकुन्तलया, शून्ये=विरहिते, अस्मिन्=पुरतःस्थिते, लतामण्डपे=वल्लीगृहे, किं करोमि? (इतो गमनमेव न्याय्यम् इति भावः) (अग्रतः=पुरतः,

---

जिस प्रकार अतीव सुकुमार शिरीष पुष्प का वृन्त कठिन होता है उसी प्रकार कोमल और गाढ़ भाव से उपभोग योग्य तुम्हारे इस रूप की विद्यमानता में तुम्हारा हृदय भला किस प्रकार इतना कठिन है?॥ ३०॥

शकुन्तला—यह सुनकर तो मुझमें चलने की शक्ति ही नहीं रही।

राजा—अब प्रियाविहीन इस लतामण्डप में ठहरकर मैं क्या करूँ? **(सामने देखकर)** अरे मेरे प्रस्थान में रुकावट आ गई।

---

have gone from here leaving me (your lover) alone, who is drown fully in your love.

As the most delicate Śireeṣa flower has a hard foot-stalk, similarly in the presence of very delicate and closly enjoyable your form, how your heart is so cruel or hard. (30)

Śakuntalā—Hearing this, I have become two weak to move.

King—Now, why should I stay in this creepers pavilion, which is dejected by my beloved. *(Watching forth)* Oh, my movement is obstructed. For—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मणिबन्धाद्गलितमिदं संक्रान्तोशीरपरिमलं तस्याः।
हृदयस्य निगडमिव मे मृणालवलयं स्थितं पुरतः॥ ३१॥

(सबहुमानमादत्ते।)

शकुन्तला—(हस्तं विलोक्य) अम्मो! दोव्वल्लसिढिलदाए परिब्भट्टं एदं मिणालवलअं ण मए परिण्णादं। [**अहो! दौर्बल्यशिथिलतया परिभ्रष्टमेतत् मृणालवलयं न मया परिज्ञातम्।**]

अवलोक्य=दृष्ट्वा) हन्त=इति हर्षे, व्याहतं=विघ्नाभिभूतम्, मे=मम, गमनम्=प्रयाणम्। गन्तुं न पारयामीति भावः।

अन्वयः—तस्याः मणिबन्धात् गलितं संक्रान्तोशीरपरिमलं मे हृदयस्य निगडम् इव इदं मृणालवलयं पुरतः स्थितम्॥ ३१॥

मणिबन्धादिति। तस्याः=शकुन्तलायाः, मणिबन्धात्=वलयधारणदेशात्, गलितं=विस्रस्तम्, संक्रान्तः=गात्रसम्पर्कात् संलग्नः, उशीरस्य=वीरणमूलानुलेपनस्य, परिमलः= गन्धप्रकर्षः, यस्मित् तत् संक्रान्तोशीरपरिमलम्, तथा मे=मम, हृदयस्य=चेतसः, निगडं=बन्धनशृङ्खला इव, इदं=पुरोदृश्यमानम्, मृणालवलयं=मृणालनिर्मितं हस्ताभरणं कटकं, पुरतः=अग्रतः, स्थितम्=वर्तते। अत्रोत्प्रेक्षालङ्कारः, पदार्थहेतुकं काव्यलिङ्गमपीति केचित्। आर्य्या जातिः॥ ३१॥

भावार्थः—शकुन्तलायाः वलयधारणदेशात् विस्रस्तं तद्गात्रसम्पर्कात् उशीरगन्धभरितम् इदं मृणालवलयं ममाग्रे तिष्ठति॥ ३१॥

(सबहुमानम्=आदरातिशयसहितम्, आदत्ते=गृह्णाति।)

शकुन्तला—(हस्तं=स्वकरं, विलोक्य=दृष्ट्वा) अहो=इति विस्मये, दौर्बल्येन=शरीरस्य कृशतया, कृशता च=कामदाहजनिता या शिथिलता=श्लथता, तया दौर्बल्यशिथिलतया, परिभ्रष्टं=हस्ताद्विगलितम्, एतत्=अलक्षीभूतं (राज्ञः करस्थितम्), मृणालवलयं=मृणालनिर्मितहस्ताभरणम्, न मया परिज्ञातम्=न लक्षितम्।

खस की सुगन्ध से सना हुआ यह कमलनाल का कंगन प्रियतमा शकुन्तला के मणिबन्ध से गिरकर हमारे हृदय के बन्धन के समान सामने पड़ा हुआ है॥ ३१॥

(आदरपूर्वक उठा लेता है।)

शकुन्तला—(अपना हाथ देखकर) ओह! शारीरिक कमजोरी तथा कामदाहजनित दुर्बलता के कारण यह मृणालवलय मेरे हाथ से खिसक गया और मुझे पता भी नहीं चला।

Scented with the fragrance of fragrant root of uśeera (a plant) this bracelet made of the fibrous root a lotus of my beloved Śakuntalā, slipped from her wrist and now laying before as if it is an iron chain for my heart. (31)

(picks up with respect)

Śakuntalā—(Looking her hand) Oh, due to weakness, when this bracelet made of fibrous root of a lotus had slipped from my wirst, not recognised by me.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(मृणालवलयमुरसि निक्षिप्य) अहो स्पर्शः !

अनेल लीलाभरणेन ते प्रिये! विहाय कान्तं भुजमत्र तिष्ठता।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया॥ ३२॥

शकुन्तला—अदो वरं ण समत्थम्हि विलंबिदुं। भोदु, एदेण ज्जेव अवदेसेण अत्ताणं दंसइस्सं। [**अतः परं न समर्थास्मि विलम्बितुम्। भवतु, एतेनैव अपदेशेन आत्मानं दर्शयिष्यामि।**] (इत्युपसर्पति)

राजा—(मृणालवलयं=बिसतन्तुनिर्मितं कटकं, उरसि=हृदये, निक्षिप्य=निधाय) अहो इति प्रसन्नतार्थे, स्पर्शः=सुखदस्पर्शः, अस्य वलयस्येति शेषः।

अन्वयः—प्रिये! कान्तं भुजं विहाय अत्र तिष्ठता अनेन ते लीलाभरणेन अचेतनेन सताऽपि दुःखभाक् एषः जनः समाश्वासितः तु त्वया न॥ ३२॥

अनेनेति। हे प्रिये! कान्तम्=मनोज्ञम्, भुजं=करम्, विहाय=त्यक्त्वा, अत्र=तिरस्कृतप्रदेशे, तुच्छभूमौ, तिष्ठता=अवस्थितेन, अनेन=मत्समीपवर्त्तिना, ते लीलाभरणेन=तव विलासालङ्कारेण, अचेतनेन=चैतन्यशून्येन, सताऽपि, दुःखं भजतीति दुःखभाक्=वियोगदुःखितः, एषः=मल्लक्षणो जनः, समाश्वासितः=सुस्थीकृतः, तु=किन्तु सचेतनया त्वया न समाश्वासितः। अत्र विभावना-विशेषोक्त्योः सन्देहसङ्करः। वंशस्थविलं वृत्तम्॥ ३२॥

भावार्थः—हे प्रिये! तव कमनीयकरं विहाय अत्र तुच्छभूमौ पतितेन अनेन जडेन, तव लीलाभरणेन यथाऽऽग्रहं समाश्वासितः तथा सचेतनया त्वया एष वियोगतापतापितः जनः न समाश्वासितः॥ ३२॥

शकुन्तला—अतः परम्=इंदृक् करुणाप्लावितकथनश्रवणानन्तरम्, विलम्बितुम्=

राजा—(**कमलनाल के कंगन को हृदय से लगाकर**) अहो! इसका स्पर्श कितना सुखकर है—

हे प्रिये! तुम्हारे कमनीय हाथों को छोड़कर यहाँ तुच्छ स्थान में पड़े हुए तुम्हारे इस मृणालवलय ने जड़ होकर भी इस दुःखभाजन व्यक्ति को आश्वासन दिया है परन्तु तुमने चेतन होकर भी ऐसा कुछ नहीं किया है॥ ३२॥

शकुन्तला—इसके पश्चात् अब मैं (इनसे मिलने में) विलम्ब नहीं कर सकती। अच्छा तो इसी बहाने अपने आपको (इन्हें) दिखाऊँ (इनके पास पहुँचूँ)। (**यह कहकर पास पहुँचती है**)

King—*(The bracelet made of fibrous root of a lotus keeping at his heart)* O, how comfortable is its touch.

O My beloved! leaving your charming hand and laying at this meanest place this bracelet made of fibrous root of a lotus, even being a dull one this grieved man has been satisfied, but being a sentient you have not done any such thing. (32)

Śakuntalā—After (hearing this) I can not delay. Shall I show myself on this pretext? *(approaches)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(दृष्ट्वा सहर्षम्) अये! जीवितेश्वरी मे प्राप्ता परिदेवनानन्तरं प्रसादेनोपकर्त्तव्योऽस्मि खलु दैवस्य।

पिपासाक्षामकण्ठेन याचितश्चाम्बु पक्षिणा।
नवमेघोज्झिता चास्य धारा निपतिता मुखे॥ ३३॥

शकुन्तला—(राज्ञः सम्मुखे स्थित्वा) अज्ज! अद्धपधे सुमरिअ एदस्स हत्थब्भंसिणो मिणालवलअस्स किदे पडिणिवुत्तम्हि कधिदं मे हिअएण तुए गहिदंत्ति। ता णिक्खिव एदं,

---

विलम्बमापादयितुं, न समर्थाऽस्मि=न शक्ताऽस्मि; भवतु, एतेनैव=मृणालवलयानयनरूपेणैव, अपदेशेन=व्याजेन छलेन वा, आत्मानं दर्शयिष्यामि। (इति=इत्थमुक्त्वा, उपसर्पति=उपगच्छति।)

राजा—(दृष्ट्वा=शकुन्तलाम् अवलोक्य, सहर्षम्=हर्षपूर्वकम्) अये! इति हर्षे सम्भ्रमे वा, मे=मम, जीवितेश्वरी=प्राणेश्वरी, प्राप्ता=उपस्थिता, परिदेवानानन्तरम्=तदर्थं कृतविलापानन्तरम्, दैवस्य=नियतेः, प्रसादेन=प्रियासमागमरूपानुग्रहेण, उपकर्त्तव्यः=उपकारभाजनीकृतोऽस्मि, खल्विति निश्चयेन।

(स्वेच्छया प्रियाया मत्समीपागमनात् उपकारभाजनीकृतोऽस्मि इति भावः।)

अन्वयः—पिपासाक्षामकण्ठेन पक्षिणा अम्बु याचितञ्च नवमेघोज्झिता धारा अस्य मुखे निपतिता च॥ ३३॥

पिपासेति। पिपासया=तृष्णया, क्षामः=शुष्कः, कण्ठो यस्य स तथोक्तेन पिपासाक्षामकण्ठेन, पक्षिणा=चातकेन, अम्बु=जलम्, याचितञ्च=प्रार्थितञ्च, नवमेघेन=वर्षणप्रवणेन जलदेन, उज्झिता=विसृष्टा, धारा=जलधारा, अस्य=तृषितचातकस्य, मुखे=मुखगह्वरे, निपतिता=प्रविष्टा च। अत्र चकारद्वयेन याचनपतनक्रिययोः समानकालताप्रतीतेः क्रियासमुच्चयोऽलङ्कारः। अप्रस्तुतप्रशंसाऽलङ्कारश्चापि प्रतीयते। पथ्यावक्त्रं वृत्तम्॥ ३३॥

भावार्थः—यथा पिपासाकुलितस्य चातकस्य जलयाचना समकालमेव तल्लाभे महान् हर्षः सम्भवति तथैव ममापि शकुन्तलादर्शनप्रार्थना समकालमेव तद्दर्शनलाभात् महान् हर्षः जात इति भावः॥ ३३॥

राजा—(देखकर हर्ष के साथ) अरे! मेरी प्राणेश्वरी आ गई। इतना दुःख देकर भी दैव ने कृपा करके मेरा उपकार ही किया है।

प्यासे चातक ने क्षीण कण्ठ होकर जल के लिए प्रार्थना की और नवीन मेघ ने उसके मुख में जलधार उडेल दी। अर्थात् मेरी प्रार्थना के साथ ही मेरी प्रिया को यहाँ भेज दिया॥ ३३॥

शकुन्तला—(राजा के सामने जाकर) आर्य! आधे मार्ग में ध्यान आया और मैं

King—*(with joy)* Oh, the mistress of my life has arrived. After giving this much sufferings, the fortune at least favoured me.

By weakened throught due to thirst the bird cātaka (name of bird which is supposed to live only on rain drops) begged some water and the new cloud over throwed the stream of water in its mouth i.e. with the request of mine the fortune sent my beloved here. (33)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(मृणालवलयमुरसि निक्षिप्य) अहो स्पर्शः !

अनेल लीलाभरणेन ते प्रिये! विहाय कान्तं भुजमत्र तिष्ठता।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया॥ ३२॥

शकुन्तला—अदो वरं ण समत्थम्हि विलंबिदुं। भोदु, एदेण ज्जेव अवदेसेण अत्ताणं दंसइस्सं। [**अतः परं न समर्थास्मि विलम्बितुम्। भवतु, एतेनैव अपदेशेन आत्मानं दर्शयिष्यामि।**] (इत्युपसर्पति)

राजा—(मृणालवलयं=बिसतन्तुनिर्मितं कटकं, उरसि=हृदये, निक्षिप्य=निधाय) अहो इति प्रसन्नतार्थे, स्पर्शः=सुखदस्पर्शः, अस्य वलयस्येति शेषः।

अन्वयः—प्रिये! कान्तं भुजं विहाय अत्र तिष्ठता अनेन ते लीलाभरणेन अचेतनेन सताऽपि दुःखभाक् एषः जनः समाश्वासितः तु त्वया न॥ ३२॥

अनेनेति। हे प्रिये! कान्तम्=मनोज्ञम्, भुजं=करम्, विहाय=त्यक्त्वा, अत्र=तिरस्कृतप्रदेशे, तुच्छभूमौ, तिष्ठता=अवस्थितेन, अनेन=मत्समीपवर्त्तिना, ते लीलाभरणेन=तव विलासालङ्कारेण, अचेतनेन=चैतन्यशून्येन, सताऽपि, दुःखं भजतीति दुःखभाक्=वियोगदुःखितः, एषः=मल्लक्षणो जनः, समाश्वासितः=सुस्थीकृतः, तु=किन्तु सचेतनया त्वया न समाश्वासितः। अत्र विभावना-विशेषोक्त्योः सन्देहसङ्करः। वंशस्थविलं वृत्तम्॥ ३२॥

भावार्थः—हे प्रिये! तव कमनीयकरं विहाय अत्र तुच्छभूमौ पतितेन अनेन जडेन, तव लीलाभरणेन यथाऽऽग्रहं समाश्वासितः तथा सचेतनया त्वया एष वियोगतापतापितः जनः न समाश्वासितः॥ ३२॥

शकुन्तला—अतः परम्=ईदृक् करुणाप्लावितकथनश्रवणानन्तरम्, विलम्बितुम्=

राजा—(**कमलनाल के कंगन को हृदय से लगाकर**) अहो! इसका स्पर्श कितना सुखकर है—

हे प्रिये! तुम्हारे कमनीय हाथों को छोड़कर यहाँ तुच्छ स्थान में पड़े हुए तुम्हारे इस मृणालवलय ने जड़ होकर भी इस दुःखभाजन व्यक्ति को आश्वासन दिया है परन्तु तुमने चेतन होकर भी ऐसा कुछ नहीं किया है॥ ३२॥

शकुन्तला—इसके पश्चात् अब मैं (इनसे मिलने में) विलम्ब नहीं कर सकती। अच्छा तो इसी बहाने अपने आपको (इन्हें) दिखाऊँ (इनके पास पहुँचूँ)। (**यह कहकर पास पहुँचती है**)

King—(The bracelet made of fibrous root of a lotus keeping at his heart) O, how comfortable is its touch.

O My beloved! leaving your charming hand and laying at this meanest place this bracelet made of fibrous root of a lotus, even being a dull one this grieved man has been satisfied, but being a sentient you have not done any such thing. (32)

***Śakuntalā*—**After (hearing this) I can not delay. Shall I show myself on this pretext? *(approaches)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(दृष्ट्वा सहर्षम्) अये! जीवितेश्वरी मे प्राप्ता परिदेवनानन्तरं प्रसादेनोपकर्त्तव्योऽस्मि खलु दैवस्य।

पिपासाक्षामकण्ठेन याचितञ्चाम्बु पक्षिणा।
नवमेघोज्झिता चास्य धारा निपतिता मुखे॥ ३३॥

शकुन्तला—(राज्ञः सम्मुखे स्थित्वा) अज्ज! अद्धपधे सुमरिअ एदस्स हत्थब्भंसिणो मिणालवलअस्स किदे पडिणिवुत्तम्हि कधिदं मे हिअएण तुए गहिदंत्ति। ता णिक्खिव एदं,

---

विलम्बमापादयितुं, न समर्थाऽस्मि=न शक्ताऽस्मि; भवतु, एतेनैव=मृणालवलयानयनरूपेणैव, अपदेशेन=व्याजेन छलेन वा, आत्मानं दर्शयिष्यामि। (इति=इत्थमुक्त्वा, उपसर्पति=उपगच्छति।)

राजा—(दृष्ट्वा=शकुन्तलाम् अवलोक्य, सहर्षम्=हर्षपूर्वकम्) अये! इति हर्षे सम्भ्रमे वा, मे=मम, जीवितेश्वरी=प्राणेश्वरी, प्राप्ता=उपस्थिता, परिदेवानानन्तरम्=तदर्थं कृतविलापानन्तरम्, दैवस्य=नियतेः, प्रसादेन=प्रियासमागमरूपानुग्रहेण, उपकर्त्तव्यः=उपकारभाजनीकृतोऽस्मि, खल्विति निश्चयेन।

(स्वेच्छया प्रियाया मत्समीपागमनात् उपकारभाजनीकृतोऽस्मि इति भावः।)

अन्वयः—पिपासाक्षामकण्ठेन पक्षिणा अम्बु याचितञ्च नवमेघोज्झिता धारा अस्य मुखे निपतिता च॥ ३३॥

पिपासेति। पिपासया=तृष्णया, क्षामः=शुष्कः, कण्ठो यस्य स तथोक्तेन पिपासाक्षामकण्ठेन, पक्षिणा=चातकेन, अम्बु=जलम्, याचितञ्च=प्रार्थितञ्च, नवमेघेन=वर्षणप्रवणेन जलदेन, उज्झिता=विसृष्टा, धारा=जलधारा, अस्य=तृषितचातकस्य, मुखे=मुखगह्वरे, निपतिता=प्रविष्टा च। अत्र चकारद्वयेन याचनपतनक्रिययोः समानकालताप्रतीतेः क्रियासमुच्चयोऽलङ्कारः। अप्रस्तुतप्रशंसाऽलङ्कारश्चापि प्रतीयते। पथ्यावक्त्रं वृत्तम्॥ ३३॥

भावार्थः—यथा पिपासाकुलितस्य चातकस्य जलयाचना समकालमेव तल्लाभे महान् हर्षः सम्भवति तथैव ममापि शकुन्तलादर्शनप्रार्थना संमकालमेव तद्दर्शनलाभात् महांन् हर्षः जात इति भावः॥ ३३॥

राजा—(देखकर हर्ष के साथ) अरे! मेरी प्राणेश्वरी आ गई। इतना दुःख देकर भी दैव ने कृपा करके मेरा उपकार ही किया है।

प्यासे चातक ने क्षीण कण्ठ होकर जल के लिए प्रार्थना की और नवीन मेघ ने उसके मुख में जलधार उडेल दी। अर्थात् मेरी प्रार्थना के साथ ही मेरी प्रिया को यहाँ भेज दिया॥ ३३॥

शकुन्तला—(राजा के सामने जाकर) आर्य! आधे मार्ग में ध्यान आया और मैं

King—*(with joy)* Oh, the mistress of my life has arrived. After giving this much sufferings, the fortune at least favoured me.

By weakened throught due to thirst the bird cātaka (name of bird which is supposed to live only on rain drops) begged some water and the new cloud over throwed the stream of water in its mouth i.e. with the request of mine the fortune sent my beloved here. (33)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मा मं अत्ताणं च मुणिअणेसुं पआसइस्सदि। **[आर्य्य! अर्द्धपथे स्मृत्वा एतस्य हस्तभ्रंशिनो मृणालवलयस्य कृते प्रतिनिवृत्तास्मि; कथितं मे हृदयेन, त्वया गृहीतमिति। तन्निक्षिप एतम्, मा मामात्मानञ्च मुनिजनेषु प्रकाशयिष्यति।]**

राजा—एकेनाभिसन्धिना प्रत्यर्पयामि।

शकुन्तला—केण उण ? **[केन पुनः ?]**

राजा—यदीदमहमेव यथास्थानं निवेशयामि।

शकुन्तला—आं, का गदी। भोदु एवं दाव। **[आः, का गतिः। भवतु एतत् तावत्।]** (इत्युपसर्पति)

शकुन्तला—(राज्ञः=दुष्यन्तस्य, सम्मुखे=अग्रे, स्थित्वा) अर्द्धं पन्था इत्यर्द्धपथस्तस्मिन् अर्द्धपथे=मध्यमार्गे, स्मृत्वा=लतामण्डपे मृणालवलयं भ्रंशमिति स्मृत्वा, एतस्य=तव पार्श्ववर्तिनः, हस्तभ्रंशिनः=करात् स्खलितस्य, मृणालवलयस्य=कमलनालनिर्मितकटकस्य, कृते=निमित्तम्, प्रतिनिवृत्तास्मि=प्रत्यागतास्मि। मे=मम, हृदयेन=अन्तःकरणेन, कथितम्=भणितम्, त्वया=भवता, गृहीतमिति=लब्धमिति। तत्=तस्मात्, एतत्=मृणालवलयम्, निक्षिप=समर्पय, माम्=शकुन्तलाम्, आत्मानम्=स्वञ्च, मुनिजनेषु=तापसजनेषु, मा प्रकाशयिष्यति=न सूचयिष्यति।

राजा—एकेन=एकेनैव, अभिसन्धिना=उद्देशेन उत केनचित् पणेनैव, प्रत्यर्पयामि= प्रदाष्यामि।

शकुन्तला—केन पुनः ?=केन पणेन ?

राजा—यदि, अहमेव=केवलमहमेव न तु त्वम्, यथास्थानं=स्थानमतिक्रम्य, तव हस्ते इत्यर्थः, निवेशयामि=परिधापयामि।

इसी हाथ से गिरे हुए मृणालवलय के लिए लौट आई हूँ; मेरे हृदय ने बताया कि उसे आपने पाया है। अतः उसे मुझे दे दीजिए एवं मुझे तथा स्वयं को मुनिजनों के समक्ष प्रकाशित न कीजिए (अर्थात् ऐसा कुछ कीजिए जिससे मुनिजन मुझे और आपको न देख पायें)।

राजा—एक ही शर्त पर इसे लौटाऊँगा।

शकुन्तला—किस शर्त पर ?

राजा—कि मैं ही इसे यथास्थान पहनाऊँगा।

शकुन्तला—ओह! और उपाय भी क्या है ? ऐसे ही सही। **(और आगे खिसक आती है।)**

***Śakuntalā**—(Reaching to the king and facing him)* O Noble One! In the middle way it came to my notice and returned for this bracelet made of the fibrous root of a lotus; my heart informed me that you have got it. Please return it to me and do not exhibit me and yourself before the sages.

King—Only on one condition, I will return it.

Śakuntalā—What is that?

King—That I, myself will place it at the proper place.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—इतः शिलापट्टैकदेशं संश्रयावः।

(इत्युभौ परिक्रम्योपविष्टौ।)

राजा—(शकुन्तलाया हस्तमादाय) अहो स्पर्शः!

हरकोपाग्निदग्धस्य दैवेनामृतवर्षिणा।
प्ररोहः सम्भृतो भूयः किंस्वित् कामतरोरयम्?॥ ३४॥

शकुन्तला—आः=इति पीडासूचकमव्ययम्, का गतिः=कः उपायः, नोपायान्तरमिति भावः। भवतु एतत् तावत्=त्वमेव करे वलयं निवेशय। (इति=एवमुक्त्वा, उपसर्पति=राजानमुपगच्छति।)

राजा—इतः=अस्मिन् पार्श्वे, शिलापट्टस्य=प्रस्तरखण्डस्य, एकदेशम्=भागमेकम्, संश्रयावः=उपविशावः। (इति=एवम्, उभौ=शकुन्तलादुष्यन्तौ, परिक्रम्य=चंक्रमणं कृत्वा, उपविष्टौ।)

राजा—(शकुन्तलायाः=स्वप्रेयस्याः, हस्तं=करम्, आदाय=गृहीत्वा) अहो=अतिशयसुखप्रदत्वादाश्चर्यकरः, स्पर्शः=करस्पर्शानुभवः।

अन्वयः—अयं हरकोपाग्निदग्धस्य कामतरोः अमृतवर्षिणा दैवेन भूयः सम्भृतः प्ररोहः किंस्वित्॥ ३४॥

हरेति। अयम्=हस्तः, हरस्य=शिवस्य, कोपाग्निना=क्रोधोत्पन्नानलेन, दग्धस्य=भस्मीकृतस्य, हरकोपाग्निदग्धस्य, काम एव तरुस्तस्य कामतरोः=मदनवृक्षस्य, अमृतवर्षिणा= पीयूषवर्षिणा, दैवेन=भागधेयेन, भूयः=पुनरपि (दहनात् परमपि), सम्भृतः=उत्पादितः, प्ररोहः=अङ्कुरः, किंस्वित्=सवितर्कप्रश्ने (शकुन्तलायाः हस्तरूपेण कामरूपस्य वृक्षस्याङ्कुर उत्पादितः किमिति भावः)। अत्र रूपकालङ्कारः किंस्विदिति सवितर्कप्रश्नेन सन्देहालङ्कारोऽपि। पथ्यावक्त्रं वृत्तम्॥ ३४॥

राजा—आओ, इस चट्टान पर एक ओर बैठ जायें।

(यह कहकर दोनों घूमकर बैठ जाते हैं।)

राजा—(शकुन्तला का हाथ पकड़कर) ओह! कितना सुखदस्पर्श है (इस हाथ का)।

कामरूपी वृक्ष, जो भगवान् भव के कोपानल से भस्म हो गया था, क्या उसे फिर से विधाता ने अमृत वर्षा कर हाथ रूपी अङ्कुर के रूप में उत्पन्न किया है॥ ३४॥

Śakuntalā*—Oh, there is no way. Well, as you please. *(approaches near)

King*—Let us occupy a portion of this stone slab. *(Roaming and sitting down)

***King*—*(Seizing Śakuntalā's hand)* Oh, how beautiful is it's touch. The tree in the shape of God of love, which was burnt in the anger-fire of lord Śivā, seems, to have become green again due to raining of nectar by the God creator, or the God creator produced this sprout in the shape of hand (of Śakuntalā) by showering nectar on the ashes of God of love. (34)**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(स्पर्शं रूपयित्वा) तुवरदु तुवरदु अज्जउत्तो। **[त्वरतां त्वरताम् आर्यपुत्रः।]**

राजा—(सहर्षमात्मगतम्) इदानीमस्मि विश्वसितः, भर्त्तुराभाषणपदमेतत्। (प्रकाशम्) सुन्दरि! नातिश्लिष्टः सन्धिरस्य मृणालवलयस्य; यदि तेऽभिमतम् तदन्यथा घटयिष्यामि।

शकुन्तला—(स्मितं कृत्वा) जधा दे रोअदि। **[यथा ते राचते।]**

राजा—(सव्याजं विलम्ब्य प्रतिमोच्य) सुन्दरि! दृश्यताम्—

भावार्थः—अयं पुरोवर्ती शकुन्तलाहस्त एवं प्रतिभाति यथा अस्याः हस्तरूपेण पुरा हरकोपाग्निदग्धस्य कामवृक्षस्य अङ्कुर एवोत्पादितः अमृतवर्षिणा दैवेनेति॥ ३४॥

शकुन्तला—(स्पर्शं रूपयित्वा=पुरुषस्पर्शजनितविकारं रोमाञ्चादिना अभिनीय) आर्य्यस्य=पूजनीयस्य, पुत्रः आर्य्यपुत्रः, त्वरताम् त्वरताम्=यथास्थानेन मृणालवलयनिवेशनाय शीघ्रतां कुरु।

राजा—(सहर्षमात्मगतम्=प्रसन्नतापूर्वकं स्वमनसि) इदानीम्=सम्प्रति, विश्वसितः= जाताश्वासः (तस्यां मम पत्नीत्वविषये इति भावः), अस्मि=भवामि। एतत्=आर्य्यपुत्रेति पदम्, भर्त्तुः=स्वामिनः, आभाषणपदं=प्रयोगयोग्यपदम् ('सर्वस्त्रीभिः पतिर्वाच्य आर्य्यपुत्रेति यौवने' इति न्यायात् शकुन्तला मां पतित्वेनैवाभिमन्यते)। (प्रकाशम्=स्पष्टम्) सुन्दरि! नातिश्लिष्टः=न सम्यक् श्लेषं गतः (न यथावत् सुष्ठु प्रकारेण वा मिलितः), सन्धिः=उभयकोटिसंयोगस्थलम्, मृणालवलयस्य=तव बिसनिर्मित कटकस्य, यदि, ते=तव, अभिमतम्=सम्मतम्, तद्=तदा, अन्यथा=पृथग्विधम्, घटयिष्यामि=योजयिष्यामि।

शकुन्तला—(स्पर्श का अभिनय कर) आर्य्यपुत्र! शीघ्रता कीजिए, शीघ्रता कीजिए।

राजा—(हर्षपूर्वक, मन में) अब मैं आश्वस्त हुआ; क्योंकि यह शब्द पति के लिए ही प्रयुक्त होता है। **(प्रगट)** सुन्दरी! इस मृणालवलय का सन्धिस्थल उचित नहीं प्रतीत होता, अतः यदि तुम कहो तो इसे दूसरी तरह बनाकर पहनाऊँ?

शकुन्तला—(मुस्कराकर) जैसी आपकी रुचि।

राजा—(बहाने से विलम्ब कर और कंगन पहनाकर) सुन्दरी! देखो—

Śakuntalā—(Acting the sense of touch) Hurry up, hurry up please O Ārya Putra.

King—(Joyfully, aside) Now I am satisfied, because the word is used for husband only. *(Openly)* O timid one! the joint of this bracelet appears improper, if you permit I will make it in other way.

Śakuntalā—(Smiling) As you please.

King—(By refusal being late and then placing the bracelet in her hand) O, timid one! see,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयं स ते श्यामलतामनोहरं विशेषशोभार्थमिवोज्झिताम्बरः।
मृणालरूपेण नवो निशाकरः करं समेत्योभयकोटिमाश्रितः॥ ३५॥

शकुन्तला—ण दाव णं पेक्खामि; पवणकंपिदकण्णुप्पलरेणुणा कलुसीकिदा मे दिट्ठी। [**न तावदेनं प्रेक्षे, पवनकम्पितकर्णोत्पलरेणुना कलुषीकृता मे दृष्टिः।**]

राजा—(सस्मितम्) यद्यनुमन्यसे, तदहमेनां वदनमारुतेन विशदां करवाणि।

शकुन्तला—(स्मितं कृत्वा=ईषद्धासपूर्वकम्) यथा=येन रूपेण, ते=तव (तुभ्यम्), रोचते=प्रीणयति।

राजा—(सव्याजं=सापदेशं, विलम्ब्य=विलम्बं कृत्वा, प्रतिमोच्य=प्रतिधाप्य) सुन्दरि! दृश्यताम्—इत्यस्य श्लोकेनायमिति पदेन साकमन्वयः।

अन्वयः—अयं सः नवः निशाकरः विशेषशोभार्थमिवोज्झिताम्बरः श्यामलता मनोहरं ते करं मृणालरूपेण समेत्य उभयकोटिम् आश्रितः॥ ३५॥

अयमिति। अयं=दृश्यमानः, सः=प्रसिद्धः, नवः=नवोदितः, निशाकरः=चन्द्रः, विशेषशोभार्थमिव=आत्मनोऽधिकतरसौन्दर्यसम्पादनार्थमिव, उज्झितं=त्यक्तम्, अम्बरम्=आकाशं, येन सः विशेषशोभार्थमिवोज्झिताम्बरः सन्, श्यामलतया=आकाशतुल्यश्यामवर्णत्वेन, श्यामलता=ज्योतिष्मती इति केचित्, मनोहरं=कमनीयम्, ते=तव, करं=हस्तं, मृणालरूपेण, समेत्य=आगत्य, उभयकोटिम्=अग्रभागद्वयम्, आश्रितः=आश्रित्य स्थितः। अत्र उत्प्रेक्षालङ्कारः वंशस्थविलं च वृत्तम्॥ ३५॥

भावार्थः—निशाकरः मृणालवलयछद्मना आत्मनोऽधिकतरसौन्दर्यसम्पादनार्थं श्यामलता मनोहरं त्वद्धस्तमाश्रित इति भावः॥ ३५॥

शकुन्तला—तावद् एनं=मृणालरूपी निशाकरं, न प्रेक्षे=न द्रष्टुं शक्नोमि। पवनेन=वायुना, कम्पितयोः=स्पन्दितयोः, कर्णोत्पलयोः=कर्णाभरणभूतकमलयोः; रेणुना=परागेन, पवनकम्पितकर्णोत्पलरेणुना, मे=मम, दृष्टिः=लोचनम्, कलुषीकृता=आवृता, अत एव नैनं द्रष्टुं शक्नोमि।

यह नवोदित चन्द्रमा विशेष सौन्दर्य पाने के लिए मानों आकाश को छोड़कर तुम्हारे श्यामल अथच सुन्दर हाथ में आ पड़ा है और मृणाल रूप से उसके दोनों भाग जुड़ गये हैं अर्थात् वह नवोदित चन्द्र मृणालवलय के रूप में तुम्हारे श्यामल कर में पूर्णचन्द्र की शोभा पा रहा है॥ ३५॥

शकुन्तला—मैं इसे नहीं देख पा रही हूँ; क्योंकि कर्णाभरण रूपी कमल की रज से मेरी दृष्टि कलुषित हो गई है।

राजा—(मुस्कराकर) यदि आज्ञा दो तो मैं फूँक मारकर उसे साफ कर दूँ।

This newly risen moon to achieve more beauty, had reached to your blackish and charming hand leaving the sky and in the shape of this bracelet made of fibrous root of a lotus. (35)

Śakuntalā—I am unable to see it, as the pollen of the lotuses, which I put into my ears as earings, has fallen into my eyes.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—तदो अणुकंपिदा भवेअं, किंतु उण अहं ण दे वीससेमि। **[ततः अनुकम्पिता भवेयम्, किन्तु पुनरहं न ते विश्वसिमिं।]**

राजा—मा मैवम्। नवो हि परिजनः सेव्यानामादेशात् परं न वर्त्तते।

शकुन्तला—अअं ज्जेव अच्चादरो अविस्सासजणओ। **[अयमेव अत्यादरः अविश्वासजनकः।]**

राजा—(स्वगतम्) नाहमेवं रमणीयमात्मनः सेवावसरं शिथिलयिष्ये। (मुखमुन्नमयितुं प्रवृत्तः)

राजा—(सस्मितम्=सेषद्धासम्) यदि=चेत्, अनुमन्यसे=अनुजानासि, तत्=तस्मात्, अहम्, एनां=रेणुकलुषितां दृष्टिम्, वदनमारुतेन=मुखवायुना, विशदां=निर्मलाम्, करवाणि=करिष्यामि।

शकुन्तला—ततः=तदा, अनुकम्पिता=अनुगृहीता, भवेयम्, किन्तु पुनरहं, ते=तव, न विश्वसिमि=विशङ्के इति भावः।

राजा—मा मैवम्= न खलु न खल्वेवम्। हि=यतः, नवः=नूतनः, परिजनः=सेवकः, सेव्यानामादेशात् परम्=उपासनीयानाम् आज्ञाव्यतिरिक्तम्, न वर्त्तते=नाचरति।

शकुन्तला—अयमेवात्यादरः=आदरातिशयः, अविश्वासजनकः=त्वयि मे विश्वासं नोत्पादयति।

राजा—(स्वगतम्=आत्मगतम्) अहम्=दुष्यन्तः, एवम्=अनायासोपलब्धम् एवंविधं, आत्मनः=स्वस्य, रमणीयम्=शोभनम्, सेवावसरम्=उपचारकरणेऽवकाशम्, न शिथिलयिष्ये=न वृथा करिष्ये। (मुखम्=शकुन्तलाया आननम्, उन्नमयितुम्=उत्तोलयितुम्, प्रवृत्तः=आरब्धवान्।)

शकुन्तला—तो मैं अनुगृहीत हूँगी, किन्तु मुझे आपका विश्वास नहीं है।

राजा—नहीं, नहीं ऐसा न कहो। एक नया सेवक स्वामी की आज्ञा से आगे नहीं बढ़ सकता।

शकुन्तला—यही अत्यधिक आदर अविश्वास का कारण है।

राजा—(**मन में**) मैं अपनी सेवा के इस रमणीय अवसर को व्यर्थ नहीं जाने दूँगा। **(शकुन्तला का मुख ऊपर उठाना चाहता है।)**

King—*(Smiling)* If you permit, I will clear it with the air of my mouth (or hissing or blowing).

Śakuntalā—Then I shall be obliged, but I have no trust in you.

King—No, no, don't say so, a new servant can not exceed the limit of his masters order.

Śakuntalā—This much respect is the cause of my unreliablity.

King—*(To himself)* I will not loose myself this beautiful chance of service. *(Tries to raise her mouth)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(शकुन्तला प्रतिषेधं रूपयन्ती विरमति।)

राजा—अयि मदिरेक्षणे! अलमस्मदविनयाशङ्कया।

शकुन्तला—(किञ्चित् दृष्ट्वा व्रीडावनतमुखी तिष्ठति।)

राजा—(अङ्गुलीभ्यां मुखमुन्नमय्य आत्मगतम्)

चारुणा स्फुरितेनायमपरिक्षतकोमलः।
पिपासतो ममानुज्ञां ददातीव प्रियाऽधरः॥ ३६॥

(शकुन्तला प्रतिषेधं=मुखोत्तोलनस्य निषेधम्, रूपयन्ती=दर्शयन्ती, विरमति= निवर्त्तते।)

राजा—अयि मदिरे=मत्तखञ्जनौ पक्षिणौ, ताविव ईक्षणे=नेत्रद्वयं, यस्याः सा तत्सम्बुद्धौ हे मदिरेक्षणे! अस्मत्=अस्मत्तः, अविनयाशङ्कया=असभ्यतापूर्णव्यवहारभयेन, अलम्=तादृशीमाशङ्कां मा कुरु (विना तवादेशेन न किञ्चित् करिष्यामि)।

शकुन्तला—(किञ्चिद् दृष्ट्वा=मुखविवर्त्तनेन राज्ञोपरि स्वल्पतरं दृष्टिपातं कृत्वा, व्रीतावनतमुखी=लज्जानम्रमुखी, तिष्ठति।)

राजा—(अङ्गुलीभ्यां=मध्यमानामिकाभ्याम्, मुखमुन्नमय्य=वदनमुत्तोल्य, आत्मगतम्=स्वगतम्)

अन्वयः—अपरिक्षतकोमलः अयं प्रियाधरः चारुणा स्फुरितेन पिपासतः मम अनुज्ञां ददातीव॥ ३६॥

चारुणेति। न परिक्षत इति अपरिक्षतः=दन्तैरदष्टपूर्वः, अत एव कोमलः=सुकुमारः, अयम्=पुरोवर्त्ती, प्रियायाः=शकुन्तलायाः, अधरः=अधरोष्ठः, प्रियाधरः, चारुणा=मनोहरेण, स्फुरितेन=निष्पन्दितेन, पिपासतः=पातुमिच्छतः, मम=मत्सम्बन्धे, अनुज्ञाम्=अनुमतिम्, ददातीव=प्रयच्छतीवेत्युत्प्रेक्षालङ्कारः॥ ३६॥

(शकुन्तला रुकने का अभिनय कर घूमती है)

राजा—ओ मादक नयनों वाली! मेरी ओर से किसी प्रकार के अशिष्ट व्यवहार की आशङ्का न करो।

शकुन्तला—(उचटती हुई दृष्टि डालकर, लज्जा से मुँह झुकाकर बैठ जाती है।)

राजा—(अँगुलियों से मुख ऊपर उठाकर, मन में)

आज से पूर्व दन्तक्षत न किये जाने से कोमल प्रियतमा शकुन्तला का यह अधरोष्ठ मधुर स्पन्दन (स्फुरण) द्वारा मानो मुझ प्यासे को पान करने की अनुमति दे रहा है॥ ३७॥

(Śakuntalā acts to stop, turns back)

***King*—O** maddening eyed, do not afraid or doubt of any evil (uncivilized) behavior from my side.

Śakuntalā*—*(Throws a little sight and sits ashamed)

King*—*(Raising her mouth up with his fingers, to himself)

(It seems as) The lower lip of my beloved, which is being unhurt so for, (by teeth) and that's why very delicate, through its sweet throbbing permitting me, a thirsty person to drink or enjoying it.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—परिण्णाणमंथरो विअ अज्जउत्तो। [**परिज्ञानमन्थर इव आर्य्यपुत्रः।**]

राजा—कर्णोत्पलसन्निकर्षादीक्षणमूढोऽस्मि। (इति मुखमारुतेन चक्षुः सेवते।)

शकुन्तला—भोदु, पइदित्थदंसणम्हि संबुत्ता। लज्जेमि उण अणुवआरिणी पिअआरिणो अज्जउत्तस्स। [**भवतु, प्रकृतिस्थदर्शनास्मि संवृत्ता। लज्जे पुनरनुपकारिणी प्रियकारिण आर्यपुत्रस्य।**]

राजा—सुन्दरि! किमन्यत्—

भावार्थः—अननुभूतचुम्बनत्वात् कस्यचिदपि दन्तैरदष्टपूर्व अत एव कोमलः प्रियाशकुन्तलाया अधरोष्ठः मनोहरेण मामकीयस्पर्शजनितस्पन्दनेन चुम्बनाभिलाषिणः मत्कृते पानानुमतिं प्रयच्छतीवेति तर्कयामि॥ ३६॥

शकुन्तला—परिज्ञाने=सम्यगर्वबोधे, मन्थरः=गतिशून्यः, इव=यथा, आर्य्यपुत्रः=भवान्।

राजा—कर्णोत्पलयोः=करणाभरणीभूतयोरुत्पलयोः, सन्निकर्षात्=सान्निध्यात् हेतोः, ईक्षणमूढः=नेत्रविज्ञानविषये सन्दिग्धवानस्मि किमिमे ईक्षणे कर्णोत्पले वेति विशेषनिरूपणेऽसमर्थोऽस्मि इत्याशयः। अथवा कर्णोत्पलस्य सन्निकर्षात्=सामीप्यात्, ईक्षणमूढः=रेणुभिरन्धीकरणात् दर्शनाक्षमोऽस्मि इत्यर्थः (कियन्मात्रो विलम्बो जात इत्यवधारणे असमर्थोऽस्मि इति भावः)। (इति=इत्युक्त्वा, मुखमारुतेन=वदनीयपवनेन, चक्षुः=नेत्रम्, सेवते=रेण्वपसारणेन परिष्करोतीत्यर्थः।)

शकुन्तला—भवतु=विरमतु भवान्, प्रकृतिस्थदर्शना=रेणूनामपगमात् स्वाभाविकदृष्टिसम्पन्ना, संवृत्ताऽस्मि=जातास्मि। पुनः=किन्तु, प्रियकारिणः=उपकारिणः, आर्य्यपुत्रस्य=भवतः (सम्बन्धे), अनुपकारिणी=किञ्चिदप्यकरणात्, अहं=शकुन्तला, लज्जे=लज्जामनुभवामि। (उपकारिणः प्रत्युपकारकरणमुचितं परं न किमपि कुर्वन् महद् व्रींडाभारात् अहं लज्जे।)

राजा—सुन्दरि=शोभने! अन्यत्=अपरम्, किम्=उपकर्त्तव्यमस्तीति शेषः।

शकुन्तला—आप तो मानो आत्मविस्मृत होते जा रहे हैं।

राजा—इस कर्णाभरणभूत कमल के पास रहने से मैं तुम्हारी आँखें नहीं देख पाता। **(मुखवायु से नेत्र में फूँक मारता है।)**

शकुन्तला—बस, मेरी आँख ठीक हो गई किन्तु आपने मेरा यह प्रिय कार्य किया और मैंने इसके बदले में आपका कोई उपकार नहीं किया, यह सोच कर मुझे लज्जा आती है।

राजा—सुन्दरी! और क्या उपकार करना चाहती हो—

Śakuntalā—O my husband (Āryaputra) it seems as you are forgetting yourself.

King—As your lotus earing is very near to my eyes, so, I became unable to see your eyes properly. *(Blowing with the air of his mouth)*

Śakuntalā—Well, my vision is clear now, but I am ashamed to think that I have not done any good to that gentleman who helped me nicely.

King—O timid one! what more you want to do?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमप्युपकृतिपक्षे सुरभि मुखं ते यदाघ्रातम्।
ननु कमलस्य मधुकरः सन्तुष्यति गन्धमात्रेण॥ ३७॥

शकुन्तला—(सस्मितम्) असंतोसे उण किं करेदि ? [**असन्तोषे पुनः किं करोति ?**]

राजा—इदम्। (इति व्यवसितः।)

(शकुन्तला वक्त्रं ढौकते।)

(नेपथ्ये) चक्कवाअवहु ! आमंतेहि सहचरं, णं उअत्थिदा रअणी। [**चक्रवाकवधु! आमन्त्रयस्व सहचरम्, ननु उपस्थिता रजनी।**]

अन्वयः—यत् ते सुरभि मुखम् आघ्रातम् इदमपि उपकृतिपक्षे (यथेष्टमिति शेषः), ननु मधुकरः कमलस्य गन्धमात्रेण सन्तुष्यति॥ ३७॥

इदमिति। यत् ते=तव, सुरभि=सौरभवत्, मुखम्=आननम्, आघ्रातम्=मया फुत्कारदान-व्याजेनाऽऽघ्रातम्, इदमपि=एतदाघ्राणमपि, उपकृतिपक्षे=त्वत्कर्तृकोपकारकोटौ, यथेष्टं गण्यतामिति शेषः। ननु=यतः, मधुकरः=भ्रमरः, कमलस्य=पद्मस्य, गन्धमात्रेण= गन्धग्रहणमात्रेणैव, सन्तुष्यति= सन्तुष्टो भवति॥ अत्र केचित् प्रतिवस्तूपमाऽलङ्कारः, अपरे तु दृष्टान्तालङ्कारमिति मन्यन्ते। उपगीति नामेयमार्या॥ ३७॥

भावार्थः—मधुपानार्थी भ्रमरः कमलस्य मधुनोऽलाभेऽपि तद्गन्धमात्रमाघ्रायैव यथा सन्तुष्टो भवति तथाऽधरपातुकामोऽप्यहं तव वदनगन्धमाघ्रायैव सन्तुष्टोऽस्मि संवृत्तः। निश्चिनोमि यत् त्वत्कृत अयं महानुपकारः॥ ३७॥

शकुन्तला—(सस्मितम्=सेषद्धासम्) पुनः=किन्तु, असन्तोषे=सन्तोषाभावे, किं करोति= किं व्यवस्यति, मधुकर इति शेषः।

राजा—इदम्=मधुकरः करोतीति शेषः। (असन्तुष्टः भ्रमरः कमलमधुपाने व्यवसितो भवतीति शेषः) (इति=एवमुक्त्वा, व्यवसितः=चुम्बनीयकृताध्यवसायः। (नाट्येऽधरपाना-देर्निषेधात् न तु चचुम्ब)।

(शकुन्तला वक्त्रं=मुखं, ढौकते=अन्यत्र चालयति, हस्ताङ्गुलीद्वारा संवृणोति।)

मैंने तुम्हारे सुगन्धित मुख को सूँघ लिया, यह क्या प्रत्युपकार नहीं है; क्योंकि भ्रमर केवल कमल की सुगन्ध से ही सन्तुष्ट हो जाया करता है॥ ३७॥

शकुन्तला—(मुस्कराकर) यदि वह सन्तुष्ट नहीं होता तब क्या करता है ?

राजा—यह करता है **(मुख चूमने की चेष्टा करता है)।**

(शकुन्तला हाथ से अपना मुँह ढाँप लेती है।)

(नेपथ्य में) अरी चकवी ! अपने सहचर को बिदा करो, क्योंकि रात हो गयी है।

When I smelt your scented mouth, is not this reservice of mine? Because a black bee always satisfies with the smell of lotus only. (37)

Śakuntalā—*(Smiling)* If not satisfied then what will he do?

King—He does this. *(Acts to kiss)*
(Śakuntalā hiding her face with her fingers)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(कर्णं दत्त्वा ससम्भ्रमम्) अज्जउत्त! एसा क्खु तादकण्णस्स धम्म-कणीअसी मम वुत्तंतोवलंभणणिमित्तं अज्जा गोदमी आअच्छदि; ता विडवांतरिदो होहि। **[आर्यपुत्र! एषा खलु तातकण्वस्य धर्मकनीयसी मम वृत्तान्तोपलम्भननिमित्तम् आर्या गौतमी आगच्छति; तद्विटपान्तरितो भव।]**

राजा—तथा। (इत्येकान्ते स्थितः)

(ततः प्रविशति पात्रहस्ता गौतमी)

गौतमी—जादे! अच्छाहिदं सुणिअ आअदा, एदं सांतिउदअं। (दृष्ट्वा समुत्थाप्य च) इध देवदासहाइणी चिट्ठसि? **[जाते! अत्याहितं श्रुत्वा आगता, एतत् शान्त्युदकम्। इह देवतासहायिनी तिष्ठसि?]**

(नेपथ्ये=परोक्षे) हे चक्रवाकवधु=हे चक्रवाकभार्य्ये! सहचरं=प्रियम्, आमन्त्रयस्व= सादरमामन्त्र्य विसृज (प्रियजनस्य प्रस्थानकाले सादरामन्त्रणौचित्यादिति भावः), ननु=यस्मात्, रजनी=युवयोर्वियोगकारिणी रात्रिः, उपस्थिता=सम्प्राप्ता खलु।

शकुन्तला—(कर्णं दत्त्वा=नेपथ्योत्थं वचनं श्रुत्वा, ससम्भ्रमम्=सत्वरम्; चक्रवाकबन्धु-व्याजेन गौतम्याः तत्रागमनं निशम्य सत्वरम्) आर्यपुत्र! खल्विति निश्चयेन, एषा=पुरोवर्त्तिनी, तातकण्वस्य=मम पितुः कुलगुरोः कण्वस्य, धर्म्मकनीयसी=धर्मभगिनी, आर्य्या=पूज्या, गौतमी=गौतमस्यापत्यं स्त्री, मम वृत्तान्तस्य=वार्तायाः, उपलम्भननिमित्तम्=परिज्ञानार्थम्, आगच्छति=समायाति। तत्=तस्मात्, विटपान्तरितः=तरुमूलाच्छादितकलेवरः, भव।

राजा—तथा=यथा ते रोचते (इत्युक्त्वा, एकान्ते=निर्जने, स्थितः)।

(ततः=तदनन्तरम्, पात्रं=शान्त्युदकभाजनं, हस्ते यस्याः सा पात्रहस्ता, गौतमी=कण्वधर्म्मभगिनी, प्रविशति मञ्चेति शेषः।)

शकुन्तला—**(कान देकर, घबराहट के साथ)** आर्य्यपुत्र! यह पिता कण्व की कनिष्ठ धर्मभगिनी आर्या गौतमी मेरा समाचार लेने यहाँ आ रही हैं, अतः आप इस वृक्ष के पीछे छिप जायें।

राजा—जैसी तुम्हारी इच्छा। **(यह कहकर एकान्त स्थल में छिप जाता है।)**

(इसके बाद हाथ में पात्र लिये हुए गौतमी का प्रवेश)

गौतमी—पुत्री! तुम्हें भयंकर दशा में सुनकर यहाँ आई हूँ। यह शान्तिजल है। **(देखकर और उठाकर)** तू क्या यहाँ देवताओं के सहारे बैठी हुई है?

(Behind the curtain) O, wife of Cakravāka! permit your companion to go because night has arrived.

Śakuntalā—(Hearing with anxiety) Āryaputra! father's younger sister-in-law revered Gauttamī is comming so, you please hide yourself behind the tree.

King—As you command. *(Thus stands in a lonly place)*

(Then enters Gauttamī having water pot in her hand)

Gauttamī—Daughter, hearing that your are suffering too much, I have come here. This is soothing water. *(Looking and*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—दाणिं ज्जेव अणसूआपिअंबदाओ मालिणीं ओदीण्णाओ। **[इदानीमेव अनसूयाप्रियंवदे मालिनीमवतीर्णे।]**

गौतमी—(शान्त्युदकेन शकुन्तलामभ्युक्ष्य) जादे! णिराबाधा मे चिरं जीव। अवि लहुसंदाबाइं अंगाइं ? **[जाते! निराबाधा मे चिरं जीव। अपि लघुसन्तापानि अङ्गानि ?]** (इति स्पृशति।)

शकुन्तला—अम्मो! अत्थि विसेसो। **[अहो! अस्ति विशेषः।]**

गौतमी—परिणदो दिअसो, ता एहि उडअं ज्जेव गच्छम्ह **[परिणतो दिवसः, तदेहि उटजमेव गच्छावः।]**

गौतमी—जाते=वत्से! अत्याहितं=सन्तापजनिता महाभीतिः, श्रुत्वा=आकर्ण्य, आगता=अत्र समागतास्मि, एतत्=इदम्, शान्त्युदकम्=सन्तापापहम् अभिमन्त्रितं जलम्। (दृष्ट्वा=इतस्ततोऽवलोक्य, समुत्थाप्य च=शकुन्तलामुटजं नेतुं हस्तधारणपूर्वकमुत्तोल्य च) इह=अत्र, देवतासहायिनी=देवतामात्रसहाया (एकाकिनी), तिष्ठसि=वर्त्तसे, किमिति शेषः।

शकुन्तला—इदानीमेव=अधुनैव, अनसूया च प्रियंवदा च=अनसूया-प्रियंवदे, मालिनीं=तदाख्यां नदीम्, अवतीर्णे=स्नानाय जलानयनाय च गते।

गौतमी—(शान्त्युदकेन=अभिमन्त्रितेन तापशमनार्थमानीतेन जलेन, शकुन्तलाम्, अभ्युक्ष्य=अभिषिच्य) जाते=वत्से! निराबाधा=निरोगा, मे=मत्सम्बन्धिनी त्वम्, चिरं जीव=दीर्घायुष्यं लभस्व, अपीति प्रश्ने, लघुः=शान्त्युदकाभ्युक्षणात्, स्वल्पः, सन्तापः=दाहः, येषु तानि लघुसन्तापानि, अङ्गानि संवृत्तानि किम्? (इति स्पृशति)

शकुन्तला—अहो! अस्ति विशेषः=पूर्वापेक्षया ईषदुपशमः।

शकुन्तला—अभी-अभी अनसूया और प्रियंवदा मालिनी नदी की ओर गई हैं।

गौतमी—**(शान्तिजल शकुन्तला पर छिड़क कर)** पुत्री! तू बिना किसी बाधा के चिरकाल तक जीवित रह। अब तो अङ्गों का ताप कम है न? **(ऐसा कहकर शकुन्तला के अङ्गों का स्पर्श करती है।)**

शकुन्तला—हाँ, पहले की अपेक्षा पर्याप्त कम है।

गौतमी—अब सन्ध्या हो गई है, आओ पर्णशाला में चलें।

---

raising her up) Are your sitting here with the help of gods i.e. alone?

Śakuntalā—Just now Anasūyā and Priyaṁvadā have gone at the bank of river Malinī.

Gauttamī—*(Sprinkling holi water on Śakuntalā)* My child long live without any suffering. Is the fever of your body (limbs) a llittle abated?

Śakuntalā—Yes mother, there is a change for the better in me.

Gauttamī—Child! The day is departing (night is approaching), come, let us both go to the cottage. *(They start)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(कथञ्चिदुत्थाय स्वगतम्) हिअअ! पढमं सुहावणदे मणोहरे कालहरणं करेसि; संपदं अणुभव दाव दुक्खं। (पदान्तरे प्रतिनिवृत्य प्रकाशम्) लदाघर! संदावहर! आमंतेमि तुमं पुणो वि परिभोअत्थं। [**हृदय! प्रथमं सुखोपनते मनोरथे कालहरणं करोषि, साम्प्रतमनुभव तावद् दुःखम्।** (पदान्तरे प्रतिनिवृत्य प्रकाशम्) [**लतागृह! सन्तापहर! आमन्त्रयामि त्वां पुनरपि परिभोगार्थम्।** (इति निष्क्रान्ते।)

राजा—(पूर्वं स्थानमुपेत्य सनिश्वासम्) अहो! विघ्नवत्यः प्रार्थितानां सिद्धयः। मया हि—

गौतमी—दिवसः=वासरः, परिणतः=अवसानं गतः, तद्=तस्मात्, एहि=आगच्छ, उटजं=कुटीरम् एव, गच्छावः=आवां गच्छावः।

शकुन्तला—(कथञ्चित्=कृच्छ्रेण, उत्थाय=शय्यातः इति शेषः) प्रथमम्=इतःपूर्वम्, सुखोपनतेः—सुखेन=अनायासेन, उपगते=समीपागते (प्राप्ते), मनोरथे=मनोरथविषयीभूते कान्ते, कालहरणं करोषि=अनापदेशेन कालक्षेपं करोषि। साम्प्रतम्=इदानीम्, तावत्, दुःखं=विरहजनितां कामपीडाम्, अनुभव=सहस्व। (पदान्तरे=कतिपयपदसञ्चारं कृत्वा, प्रतिनिवृत्त्य=तत्क्षणं निवृत्त्य, लतागृह=निकुञ्ज! (अत्र तदन्तरगतः प्रियतमो ध्वन्यते), सन्तापहर!=सन्तापनाशक! पुनरपि=भूयोऽपि, परिभोगार्थम्=एकत्रवासार्थम्, त्वम्=लतागृहं दुष्यन्तं च, आमन्त्रये=निवेदयामि। (इति=इत्युक्त्वा, निष्क्रान्ते)

राजा—(पूर्वस्थानं=शकुन्तलया सहोपभुक्तं लतागृहस्थं शिलातलम्, उपेत्य=प्राप्य, सनिःश्वासम्=दीर्घं निःश्वस्य) अहो=इति विषादे, प्रार्थितानाम्=अभिलषितानाम्, अर्थानाम्=प्रयोजनानाम्, सिद्धयः=निष्पत्तयः, विघ्नवत्यः=बहुविघ्नाः। हि=यस्मात्, मया=मुखमुन्नमितं न तु चुम्बितमिति श्लोकेन सहान्वयः—

शकुन्तला—(कठिनतापूर्वक उठते हुए मन में) हृदय! अनायास अपने प्रिय को पाकर भी तुमने व्यर्थ समय बिताया है अतः अब दुःख भोगो। **(कुछ पग चलकर और लौटकर—प्रगट)** हे मेरे सन्तापनाशक लतागृह! परिभोग के लिए मैं फिर भी तुम्हें निमन्त्रित करती हूँ। **(दोनों का प्रस्थान)**

राजा—(पहले स्थान पर आकर लम्बी साँस लेकर) अहो! अभीष्ट सिद्धि में बहुत से विघ्न आ जाते हैं; क्योंकि—

Śakuntalā—(Rising up with difficulty, to herself)

O My heart, even before, when the object of your desire come itself so readily, you did not find courage (to accept it), why then this anguish now when seperated and (consequently) filled with repentence. *(Taking a step and standing still, aloud)* O bower of creepers, O remover of my sufferings, I bid you farewell (hoping) to be once more happy (under your shade). *(Both exits)*

King—(Returning to the former place, having a sigh) How the accomplishment of one's wishes is best with obstacles.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं, न चुम्बितं तु॥ ३८॥

क्व नु खलु सम्प्रति गच्छामि। अथवा इहैव प्रियापरिभुक्ते लतामण्डपे मुहूर्त्तं तिष्ठामि। (सर्वतोऽवलोक्य)

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
कान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः।

अन्वयः—मुहुः अङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् अंसविवर्त्ति पक्ष्मलाक्ष्याः मुखं कथमप्युन्नमितम्, तु न चुम्बितम्॥ ३८॥

मुहुरिति। मुहुः=वारं-वारम्, अङ्गुलिभिः संवृतः=आवृतः, अधरोष्ठः=निम्नोष्ठः, यत्र तत् अङ्गुलिसंवृताधरोष्ठम्, प्रतिषेधाक्षरैः=निषेधबोधकवर्णैः, विक्लवं=विह्वलं, तथापि अभिरामम्=मनोज्ञम्, अथवा—प्रतिषेधाक्षरैर्यः विक्लवः=वैक्लव्यम्, स्पष्टमनुच्चारणं, तेन अभिरामं=मनोहरम्, तथा अंसे=स्कन्धोपरिभागे, विवर्त्तते=चुम्बनभयात् लज्जयैव वा परावर्तत, इति अंसविवर्त्ति, पक्ष्माणि=नेत्रलोमानि, अनयोः सन्तीति पक्ष्मले=प्रशस्तलोमशालिनी, अक्षिणी=दृशौ, यस्यास्त-स्यास्तथोक्तायाः=शकुन्तलायाः, मुखम्=आननम्, कथमपि=व्याजेन, कृच्छ्रेण, उन्नमितम्=चुम्बनार्थमुत्तोलितं, तु=किन्तु, न चुम्बितम्=नास्वादितम्। अत्र स्वभावोक्तिरलङ्कारः औपच्छन्द-सिकञ्च वृत्तम्॥ ३८॥

भावार्थः—वारं-वारं मत्कर्तृकचुम्बनप्रतिषेधकरणाय अधरोष्ठं सङ्गोपयन्ती तथा च प्रति-षेधाक्षरजन्यवैक्लव्याभिरामम् अंसविवर्त्ति पक्ष्मलाक्ष्याः शकुन्तलायाः मुखम् अक्षिपरिमार्जनव्याजेन मया कथमपि कृच्छ्रेण उन्नमितम्, किन्तु प्रमादातिशयात्र चुम्बितम् इति भावः॥ ३८॥

सम्प्रति=इदानीम्, क्व नु=कुत्र, खल्विति निश्चयेन वितर्के वा, गच्छामि। अथवा=उत, इहैव=अत्रैव, प्रियया=शकुन्तलया, परिभुक्ते=व्यवहृते, लतामण्डपे=निकुञ्जे, मुहूर्तं=क्षणोऽर्द्धम्, तिष्ठामि। (सर्वतोऽवलोक्य परितः दृष्ट्वा)

उस लम्बी पलकों से युक्त आँखों वाली प्रिया ने बार-बार अपने अधरोष्ठ को अँगुलियों से ढाँपा था तथा निषेधपरक अक्षरों का उच्चारण करते समय जो अतीव मनोहर लग रही थी एवं जिसका मुख कई बार कन्धों के ऊपर तक आ गया था—उस अपनी प्रिया के मुख को मैं किसी प्रकार ऊपर तो उठा पाया परन्तु चूम नहीं सका॥ ३८॥

अब मैं कहाँ जाऊँ? अच्छा, इस प्रिया द्वारा सेवित लतामण्डप में ही थोड़ी देर बैठूँ।

(चारों ओर देखकर)

इस शिला पर उसके शरीर से कुचले हुई फूलों का बिस्तर है, कमलदल पर नाखूनों से लिखा हुआ यह काम सम्बन्धी लेख है तथा उसके हाथ से फिसल कर गिरा हुआ यह

For the face of that (maiden) with soft eye-lashes, which had the lower lip repeatedly covered by her fingers, which looked beautiful as it stammered words of denial and which was turned on one side, was some how raised by me but not kissed. (38)

On this stony slab there is her bed made of flowers and pressed by her body, carved with the help of nails on the lotus leaf,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हस्ताद् भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहादीशोऽस्मि शून्यादपि॥ ३९॥

(विचिन्त्य) अहो धिगसम्यक् चेष्टितं प्रियां समासाद्य कालहरणं कुर्वता मया। तदिदानीम्—

रहः प्रत्यासत्तिं यदि सुवदना यास्यति पुन-
र्न कालं हास्यामि, प्रकृतिदुरवापा हि विषयाः।

अन्वयः—तस्याः शरीरलुलिता इयं शिलायां पुष्पमयी शय्या, (तथा) नलिनीपत्रे नखैरर्पितः एषः कान्तः मन्मथलेखः, (तथा) हस्ताद् भ्रष्टम् इदं विसाभरणम् (तिष्ठतीति शेषः); इति आसज्यमानेक्षणः (अहम्) शून्यात् अपि वेतसगृहात् सहसा निर्गन्तुं न ईशः॥ ३९॥

तस्या इति। तस्याः=शकुन्तलायाः, शरीरेण=देहेन, लुलिता=विमर्दिता, शरीरलुलिता, इयं=दृश्यमाना, शिलायाम्=उपलखण्डोपरि, पुष्पमयी=पुष्परचिता, शय्या=तल्पम्, (तथा) नलिनीपत्रे=पद्मपत्रे, नखैः=कररुहैः, अर्पितः=अङ्कितः, एषः=पुरःस्थितः, कान्तः=कमनीयः, मन्मथलेखः=मदनसम्बन्धी लेखः, (तथा) हस्ताद्=करात्, भ्रष्टं=गलितम्, इदं=पुरोवर्त्ति, बिसाभरणम्=मृणालवलयम् (तिष्ठतीति शेषः), इति=इति हेतौ, आसज्यमानेक्षणः—आसज्यमाने=प्रियाया वस्तुत्वादेव द्रष्टुं प्रवृत्ते, ईक्षणे=चक्षुषी, यस्य सः तथोक्तः (अहम्), शून्यात्=प्रियतमाविरहितात् अपि, वेतसगृहात्=वेतसमण्डपात्, सहसा=हठात्, निर्गन्तुं=बहिः गन्तुम्, न ईशः=न समर्थः। अत्र काव्यलिङ्गमलङ्कारः, शार्दूलविक्रीडितं वृत्तम्॥ ३९॥

भावार्थः—सम्मुखस्थशिलायां तस्याः शरीरविमर्दितां पुष्परचितशय्याम्, तथा पद्मपत्रनखाङ्कितमन्मथलेखं किञ्च हस्ताद् भ्रष्टमिदं मृणालवलयम् अवलोक्य प्रियाविरहितवेतसगृहात् सहसा निर्गन्तुं नाहमस्मि समर्थः इति॥ ३९॥

(विचिन्त्य=विचार्य्य) अहो इति विषादे, प्रियां=शकुन्तलाम्, समासाद्य=प्राप्य, कालहरणं=कालक्षेपम्, कुर्वता मया असम्यक्=असाधु, चेष्टितम्=अनुष्ठितम्। तत्=तस्मात्, इदानीम्=अधुना—

मृणाल का कंगन है (इन सबको देखकर) प्रियाहीन होने पर भी इस लतामण्डप से मैं अचानक बाहर निकल पाने में समर्थ नहीं हो रहा हूँ॥ ३९॥

(विचार कर) हाय, मैंने अपनी प्रिया को पाकर भी व्यर्थ समय खोकर उचित नहीं किया। इसीलिए इस समय—

यदि वह सुन्दर मुखवाली शकुन्तला मुझे एकान्त में मिल जाय तो अब मैं समय को व्यर्थ न जाने दूँगा; क्योंकि विषयभोग स्वभावतः ही दुर्लभ होते हैं अतः प्राप्त होते ही इनका

---

there is the article for God Kāma and this is the bracelet made of lotus fibers, seeing all these I feel myself helpless to go out of this bower of creeper, though it is without my beloved. (39)

Oh! even finding my beloved nearer I wasts time, it was quite improper. So, now—

If, the possessor of beautiful face met me once again in some lonly place, I will not waste the time aimlessly. Sensual enjoy-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति क्लिष्टं विघ्नैर्गणयति च मे मूढहृदयं
प्रियायाः प्रत्यक्षं किमपि च तथा कातरमिव॥ ४०॥

(नेपथ्ये) भो भो राजन्!

सायन्तने सवनकर्मणि सम्प्रवृत्ते
वेदिं हुताशनवतीं परितः प्रकीर्णाः।

अन्वयः—सुवदना यदि रहः प्रत्यासत्तिं यास्यति पुनः तदा कालं न हास्यामि, हि विषयाः प्रकृतिदुरवापाः। विघ्नैः क्लिष्टं मे मूढहृदयम् इति गणयति च प्रियायाः प्रत्यक्षं तथा किमपि कातरमिव आसीद् इति शेषः॥ ४०॥

रह इति। सुष्ठु वदनं यस्याः सा सुवदना=सुन्दरमुखी, सा शकुन्तला, यदि=पुनरपि, रहः=विविक्ते स्थाने (एकान्ते), प्रत्यासत्तिं=मम सन्निकर्षं, यास्यति=प्राप्स्यति, पुनः=भूयः, तदा, कालं=समयं, न हास्यामि=न परिहरिष्यामि। हि=यस्मात्, विषयाः=इन्द्रियार्थाः, प्रकृत्या=स्वभावेनैव, दुरापाः=दुर्लभाः, विघ्नैः=प्रत्यूहैः, क्लिष्टम्=अभिलषितार्थालाभेन व्याहतम्, मे=मम, मूढहृदयं=कर्तव्यताज्ञानशून्यं चेतः, इति=इत्थं, गणयति=विचारयति, च=परञ्च, प्रियायाः=शकुन्तलायाः, प्रत्यक्षं=समक्षम्, तथा=तादृशं, किमपि=अनिर्वचनीयम्, कातरमिव=कर्त्तव्यविक्लवमिव, आसीदिति। अत्र कातरमिव इत्युत्प्रेक्षा तथा च प्रथमचरणद्वये सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। शिखरिणी वृत्तम्॥ ४०॥

भावार्थः—अत एव अधुना पुनरपि यदि मे प्रियतमा सह रहसि साक्षात्कारो भवेत् तथा विना रमणं कालक्षेपं न करिष्यामि। यतो हि भोगपदार्थाः स्वभावेनैव दुर्लभा भवन्ति अत एव ते प्राप्तिमात्रेण भोक्तव्याः। परन्तु विघ्नैः क्लिष्टं मम कर्तव्यताज्ञानशून्यं चेतः इदानीं प्रियाया असद्भावावस्थायाम् इत्थं विचारयति परन्तु प्रेयस्याः शकुन्तलायाः सन्निधौ तु कर्तव्यविक्लवमिव आसीत्॥ ४०॥

(नेपथ्ये=परोक्षे) भो-भो राजन्! सम्भ्रमे द्विरुक्तिः—

अन्वयः—सायन्तने सवनकर्मणि सम्प्रवृत्ते हुताशनवतीं वेदिं परितः प्रकीर्णाः (अत एव) बहुधा भयम् आदधाना सन्ध्याभ्रकूटकपिशाः पिशिताशनानां छायाः चरन्ति॥ ४१॥

सायन्तन इति। सायं भवः सायन्तनः, तस्मिन् सायन्तने=सायंकाले, सायं निवर्त्तनीये इत्यर्थः, सवनकर्मणि=यजनकर्मणि, सम्प्रवृत्ते=प्रारब्धे सति, हुताशनवतीम्=अग्नियुक्ताम्, वेदिं=

उपभोग कर लेना चाहिए। विघ्नों से बाधित मेरा कर्तव्यज्ञानशून्य (मूढ़) मन अब इस प्रकार सोच रहा है परन्तु प्रिया के सामने न जाने क्यों उस प्रकार कातर हो गया था॥ ४०॥

(नेपथ्य में) राजन्! राजन्!

सायंकालीन अग्निहोत्र के आरम्भ होते ही प्रज्वलित अग्नियुक्त वेदी के चारों ओर

---

ments are rarely available, so a man should enjoy these when ever he finds them. Perturbed by the obstacles, this infatuated heart of mine, now thinking thus, but in the presence of my beloved why this heart was so timid? (40)

(Behind the Curtain)

King! King! The evening sacrificial rite being commenced,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्याभ्रकूटकपिशाः पिशिताशनानाम्॥ ४१॥

राजा—(आकर्ण्य सावष्टम्भम्) भो भोस्तपस्विनः! मा भैष्ट मा भैष्ट, अंयमहमागत एव।

(इति निष्क्रान्तः।)

इति तृतीयोऽङ्कः।

यज्ञीयवेदिकाम्, परितः=चुतुर्षु पार्श्वेषु, प्रकीर्णाः=व्याप्ताः, अत एव, बहुधा=नानाविधोपद्रवकरणेन, भयं=भीतिम्, आदधानाः=उत्पादयन्त्यः, सन्ध्याभ्रकूटवत्=सायंतनजलदसमूहवत्, कपिशाः=कृष्णरक्ताः, पिशिताशनानाम्=राक्षसानाम्, छायाः=प्रतिबिम्बानि, चरन्ति=इतस्ततो भ्रमन्ति। अत्र सन्ध्याभ्रकूटकपिशा इति लुप्तोपमा तथा परितः प्रकीर्णा अत एव भयमादधाना इति हेतुहेतुमद्भावात्काव्यलिङ्गम्। वसन्ततिलका वृत्तम्॥ ४१॥

भावार्थः—सायन्तने अग्निहोत्रे प्रारब्धे सति हुताशनवर्ती वेदिं परितः व्याप्ताः भयमादधाना, सायन्तनजलदसमूहवत् कृष्णरक्ताः राक्षसानां छाया इतस्ततो गतागतं कुर्वन्ति। तथा च माया-कृतादृश्यशरीरा अपि राक्षसा यज्ञीयाग्निसन्निकर्षात् पतन्तीभिश्छायाभिरनुमीयन्तेऽत एव तेषां विनाशायाशु यत्नः करणीय इति सत्वरमागम्यतामिति भावः॥ ४१॥

राजा—(आकर्ण्य=नेपथ्योत्थं वाक्यं श्रुत्वा, सावष्टम्भम्=सधैर्यम्) भो भोस्तपस्विनः! मा भैष्ट मा भैष्ट=राक्षसेभ्यो भयं न कार्य्यम्? अयमहम्=साहाय्यकारी राजा दुष्यन्तः, आगत एव=राक्षसवधाय आगच्छाम्येव। (इति=एवमुक्त्वा, निष्क्रान्तः=निर्गतः)

इति तृतीयोऽङ्कः।

सायंकाल मेघसमूह की भाँति पिङ्गलवर्ण के भयदायक राक्षसों के विविध प्रकार के प्रतिबिम्ब (यहाँ) चक्कर लगाने लगे हैं (इन्हें भगाने के लिए आप शीघ्र यहाँ आयें)॥ ४१॥

राजा—(**नेपथ्य में कहे गये शब्दों को सुनकर, धैर्यपूर्वक**) ओ तपस्वियों! आप लोग भयभीत न हों, यह मैं आ पहुँचा हूँ। (**यह कहकर चला जाता है।**)

तृतीय अंक समाप्त।

---

the shadows of evil spirits, brown as evening clouds and scattered around the all, which possesses the fire (kindled) are roaming about, inspiring terror in various ways. (41)

King—*(Having heard with haughtiness)* O ascetics, don't be affraid, here I came. *(Exit)*

Thus end of act Third

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection